शंभुतेजाःशिवाशोकहारीगौरीसुखावहः ॥ उमांगमलजोगौरीतेजोभूःस्वर्धुनीभवः ॥२६॥ यज्ञकायोमहानादोगिरिवर्ष्माशुभाननः ॥ सर्वात्मासर्वदेवात्माब्रह्ममू
र्द्धाककुप्श्रुतिः ॥२७॥ ब्रह्मांडकुंभश्चिद्व्योमभालःसत्यशिरोरुहः ॥ जगज्जन्मलयोन्मेषनिमेषोग्न्यर्कसोमदृक् ॥२८॥ गिरींद्रैकरदोधर्माधर्मोष्ठःसामबृंहितः ॥ ग्रह
र्क्षदशनोवाणीजिह्वोवासविनायक ॥२९॥ भ्रूमध्यसंस्थितकरोब्रह्मविद्यामदोदकः ॥ कुलाचलांसःसोमार्कघंटोरुद्रशिरोधरः ॥३०॥ नदीनदभुजःसर्पांगुलीकता

रक्तानखः॥ व्योमनाभिःश्रीहृदयोमेरुपृष्ठोर्णवोदरः॥ ३१॥ कुक्षिस्थयक्षगंधर्वरक्षःकिंनरमानुषः॥ पृथ्वीकटिःसृष्टिलिंगःशैलोरुर्दस्रजानुकः॥ ३२॥ पातालजंघोमु
निपात्कालांगुष्ठस्त्रयीतनुः॥ ज्योतिर्मंडललांगूलोहृदयालाननिश्चलः॥ ३३॥ हृत्पद्मकर्णिकाशालीवियत्केलिसरोवरः॥ सद्भक्तध्याननिगडःपूजावारिनिवारि
तः॥ ३४॥ प्रतापीकश्यपसुतोगणकोमंदरेबलिः॥ यशस्वीधार्मिकःस्वोजाप्रथमेरः॥ ३५॥ चिंतामणिद्वीपपतिःकल्पद्रुमवनालयः॥ रत्नमंडपमध्यस्थोरत्नसिंहा
सनाश्रयः॥ ३६॥ तीव्राशिरोधृतपदोज्वालिनीमौलिलालितः॥ नंदानंदितपीठश्रीर्भोगिनीभूषितासनः॥ ३७॥ सकामदायिनीपीठःस्फुरदुग्रासनाश्रयः॥ तेजोवती
शिरोरत्नसत्यानित्यावतंसितः॥ ३८॥ सविघ्ननाशिनीपीठःसर्वशक्त्यंबुजाश्रयः॥ लिपिपद्मासनाधारोवह्निधामत्रयालयः॥ उन्नतप्रपदोगूढगुल्फःसंवृतपार्ष्णिकः
पीनजंघःश्लिष्टजानुःस्थूलोरुःप्रोन्नमत्कटिः॥ ४०॥ निम्ननाभिःस्थूलकुक्षिःपीनवक्षाबृहद्भुजः॥ पीनस्कंधःकंबुकंठोलंबोष्ठोलंबनासिकः॥ ४१॥ भग्नवामरदुः
स्तुंगसव्यदंतोमहाहनुः॥ ह्रस्वनेत्रत्रयंशूर्पकर्णोनिबिडमस्तकः॥ ४२॥ स्तबकाकारकुंभारत्नमौलिर्निरंकुशः॥ सर्पहारःकटिसूत्रःसर्पयज्ञोपवीतवान्
॥ ४३॥ सर्पकोटीरकटकःसर्पग्रैवेयकांगदः॥ सर्पकक्षोदराबंधःसर्पराजोत्तरःछद॥ ४४॥ रक्तोरक्तांबरधरोरक्तमाल्यविभूषणः॥ रक्तेक्षणोरक्तकरोरक्ततालोष्ठप

द्भवः ॥ श्वेतः श्वेतांबरधरो श्वेतमाल्यविभूषणः ॥ श्वेतातपत्ररुचिरः श्वेतचामरवीजितः ॥ ४६ ॥ सर्वावयवसंपूर्णः सर्वलक्षणलक्षितः ॥ सर्वाभरणशोभाढ्यः सर्वशो
भासमन्वितः ॥ ४७ ॥ सर्वमंगलमांगल्यः सर्वकारणकारणं ॥ सर्वदैककरः शार्ङ्गी बीजपूरगदाधरः ॥ ४८ ॥ शुक्लांगो लोकशुभदा सारंगसुतवर्द्धनः ॥ किरीटी कुंडली
हारी वनमाली शुभांगदः ॥ ४९ ॥ इक्षुचापधरः शूली चक्रपाणिः सरोजधृक् ॥ पाशी धृतोत्पलः शालीमंजरीभृत्स्वदंतभृत् ॥ ५० ॥ कल्पवल्लीधरो विश्वाभयदैककरो
वशी ॥ अक्षमालाधरो ज्ञानमुद्रावान्मुद्गरायुधः ॥ ५१ ॥ मूमिपात्रीकुंभधरो विधृतालिसमूहकः ॥ करस्याम्रफलश्चूतकलिकाभृत्कुठारवान् ॥ ५२ ॥ पुष्करस्थघटी
स्वर्णपूर्णरत्नाभिवर्षकः ॥ भारतीसुंदरीनाथो विनायकरतिप्रियः ॥ महालक्ष्मीप्रियतमः सिद्धलक्ष्मीमनोरमः ॥ ५३ ॥ रमारमेशपूर्वांगो दक्षिणोमामहेश्वरः ॥ मही
वराहवामांगो रतिकंदर्पपश्चिमः ॥ ५४ ॥ आमोदमोदजननः सुप्रमोदप्रमोदनः ॥ समर्द्धितमहावृद्धिः ऋद्धिसिद्धिप्रवर्द्धनः ॥ ५५ ॥ दंतसौमुख्यसुमुख्यसुमुखः कां
तिकंदर्पपश्चिमः ॥ मदनावल्याश्रितांघ्रिः कृत्तदौर्मुख्यदुर्मुखः ॥ ५६ ॥ विघ्नसंपल्लवोपघ्नसेवोन्निद्रमदद्रवः ॥ विघ्नकृन्निघ्नचरणो द्राविणीशक्तिसंयुतः ॥ ५७ ॥ ती
व्रप्रसन्ननयनो ज्वालिनीपालनैकधृक् ॥ मोहिनीमोहनो भोगदायिनी कांतिमंडितः ॥ ५८ ॥ कामिनीकांतवक्त्रश्रीरधिष्ठितवसुंधरः ॥ वसुधारामदोन्नद्धमहाशं

खनिधिप्रभुः ॥ ५९ ॥ सर्वसद्गुरुसंसेव्योशोचिष्केशहृदाश्रयः ॥ ईशानमूर्द्धा देवेंद्रशिखः पवननंदनः ॥ ६० ॥ प्रत्यग्रनयनोदिव्योदिव्यास्त्राणांप्रयोगवित् ॥ ऐरा
वतादिसर्वाशावारणोवारणप्रियः ॥ ६१ ॥ वज्राद्यस्त्रपरीवारोगणचंडसमाश्रयः ॥ जयशब्दपरोजेताविजयीविजयावहः ॥ ६२ ॥ अजपार्चितपदाब्जोनित्यानित्य
वितंसितः ॥ विलासिनीकृतोल्लासःशौंडीसौदर्यमंडितः ॥ ६३ ॥ अनंतानंतसुखदःसुमंगलसुमंगलः ॥ ज्ञानशक्तिक्रियाधार इच्छाधारोनिषेवितः ॥ ६४ ॥ सुभगासं
श्रितपदोल्ललितोललिताश्रय ॥ कामिनीपालनःकामकामिनीकेलिलालसः ॥ ६५ ॥ सरस्वत्याश्रयोगौरीनंदनःश्रीनिकेतनः ॥ गुरुगुप्तपदोवाचासिद्धोवागीश्व
रीपति ॥ ६६ ॥ नलिनीकामुकोरामावामाज्येष्ठामनोरमः ॥ ह्रौंह्रौंमुद्रितपादाब्जोहुंबीजस्तुंगशक्तिमान् ॥ ६७ ॥ विश्वादिबीजनिर्बीजःस्वाहाशक्तिःसकीलकः ॥ अ
मृताब्धिहृन्नावासोमदाघूर्णितलोचनः ॥ ६८ ॥ उच्छिष्टोच्छिष्टगणपोगणेशोगणनायकः ॥ सर्वकालिकसंसिद्धिर्नित्यसेव्योदिगंबरः ॥ अनपायोनंतदृष्टिरप्रमेयो
जरामरः ॥ अनाविलोप्रतिहतोच्युतोमतमक्षरः ॥ ७० ॥ अप्रतर्क्योक्षयोजय्योनाधारोनाधारोनामयोमलः ॥ अनाकारोविधूमाग्निवक्त्रोव्यक्तलक्षणः ॥ ७१ ॥
आधारपीठआधार आधाराधेयवर्जितः ॥ आखुकेतनआंशापूरक आखुमहारथः ॥ ७२ ॥ इक्षुसागरमध्यस्थइक्षुभक्षणलालसः ॥ इक्षुचापातिरेकश्रीरिंइचाप

निषेविन ॥७७॥ इद्रगोपसमानश्रीरिद्रनीलनिभद्युतिः ॥ इदीवरदलश्यामइदुमंडलमंडितः ॥ इध्माप्रियइडाभागइडाधामेंदिराप्रियः ॥ इक्ष्वाकुविघ्नविध्वंसीइतिक
र्तव्यतेप्सितः ॥ ईशानमौलिरीशानईशानप्रियईतिहा ॥ ईषणात्रयकल्पांतईहामात्रविवर्जितः ॥ उपेंद्रउग्रउडुभृन्मौलिरिंदुकरप्रियः ॥ उन्नताननउत्तुंगउदारस्त्रि
दशाग्रणी ॥ उर्जस्वानुज्वलननुरुहापोहविवर्जित ॥ ऋग्यजुःसामनयनऋद्धिसिद्धिसमर्पकः ॥७८॥ ऋजुचित्तैकसुलभऋणत्रयविमोचकः ॥ लुप्तविघ्नस्वभक्तानां
लुप्तशक्तिःसुरद्विषां ॥७९॥ लुप्तश्रीर्विमुखार्चानांलूताविस्फोटनाशनः ॥ एकारपीठमध्यस्थएकपादकृतासन ॥८०॥ एजिताखिलदैत्यश्रीरेधिताखिलसंश्रि
तः ॥ ऐश्वर्यनिधिरैश्वर्यमैहिकामुष्मिकप्रदः ॥८१॥ ऐरंमदसमोन्मेषऐरावतनिभाननः ॥ ओंकारवाच्यओंकारओजस्वानोषधीपतिः ॥८२॥ औदार्यनिधिरौद्धत्य
धैर्यऔन्नत्यनिःसमः ॥ अंकुशःसुरनागानामंकुशःसुरविद्विषां ॥८३॥ अःसमस्तविसर्गांतपदेषुपरिकीर्तितः ॥ कमंडलुधरःकल्पःकपर्दीकलभाननः ॥८४॥ कर्मसाक्षी
कर्मसीद्धिःकर्मकर्मफलप्रदः ॥ कदंबगोलकाकारःकूष्मांडगणनायकः ॥८५॥ कारुण्यदेहःकपिलकथःकटिसूत्रभृत ॥ खर्वखड्गप्रियःखड्गिखस्थानस्थःखनिर्म
लः ॥८६॥ खल्वाटशृंगनिलयःखट्वांगीखगुणाश्रयः ॥ गुणाढ्योगहनोगद्योगद्यपद्यसुधार्णवः ॥८७॥ गद्यगानप्रियोगर्जोगीतगीर्वाणपूर्वजः ॥ गुह्याचाररतोगुह्योगु

ह्यो गुह्यागमनिरूपितः ॥ ८८ ॥ गुहाशयो गुहाब्धिस्थो गुरुगम्यो गुरोर्गुरुः ॥ घंटाघर्घरिकामाली घटकुंभो घटोदरः ॥ ८९ ॥ ङकारवाच्यो ङःकारो ङःकाराकारशुंडभृत् ॥
चंडश्चंडेश्वरसुहृत् चंडेशश्चंडविक्रमः ॥ चराचरपिताचिंतामणिश्चर्वणलालसः ॥ ९० ॥ छंदश्छंदोद्भवः छंददुर्लक्ष्यश्छंदविग्रहः ॥ जगद्योनिर्जगत्साक्षी जगदी
शो जगन्मयः ॥ ९१ ॥ जयो जयपरो जप्यो जिह्वासिंहासनप्रभुः ॥ झलज्झलोल्लसद्दानझंकारिभ्रमराकुलः ॥ ९२ ॥ टंकारस्फारसंरावष्टंकारिमणिनूपुरः ॥ ठद्वयंपल्लवा
तस्यसर्वमगलदायकः ॥ डिंडिमुंडो डाकिनीशो डामरो डिंडिमप्रियः ॥ ढक्कानिनादमुदितो ढौ ढुंढिविनायकः ॥ ९४ ॥ तत्वानां प्रकृतिस्तत्वं तत्वंपदनिरूपितः
तारकांतरसंस्थानस्तारकास्तारकांतकः ॥ ९५ ॥ स्थाणुप्रियस्थाणुस्थानास्थावरंजंगमंजगत् ॥ दक्षयज्ञप्रमथनो दाता दानं दमो दया ॥ ९६ ॥ दयावान्दिव्यविभवो
दंडभृद्दंडनायकः ॥ दंतप्रभिन्नाभ्रमालो दैत्यवारणदारणः ॥ ९७ ॥ दंष्ट्रालग्नद्विपघटो देवत्राथींगजाकृतिः ॥ धनंधनपतिर्धन्यो धनदो धरणीधरः ॥ ९८ ॥ ध्यानैक
प्रकटो ध्येयो ध्यानं ध्यानपरायणः ॥ नद्यो नादप्रियो नादो नादमध्ये प्रतिष्ठितः ॥ ९९ ॥ निष्कलो निर्मलो नित्यो नित्यानित्यो निरामयः ॥ परव्योम परंधाम परमात्मा प
रंपदं ॥ १०० ॥ परात्परः पशुपतिः पशुपाशविमोचनः ॥ पूर्णानंदपरानंदः पुराणपुरुषोत्तमः ॥ १ ॥ पद्मप्रसन्नवदनः प्रणताज्ञाननाशनः ॥ प्रमाणप्रत्ययातीतः प्रणता

र्त्तिं निवारणः॥ २॥ फणिहस्तः फणिपतिः फूत्कारी फणिप्रियः॥ वाणार्चितांघ्रियुगलो वालकेलिकुतूहली॥ ३॥ ब्रह्म ब्रह्मार्चितपदो ब्रह्मचारी बृहस्पतिः॥ बृहत्तरो ब्रह्म
परो ब्रह्मण्यो ब्रह्मवित्प्रियः॥ ४॥ बृहन्नादाग्र्यचीत्कारो ब्रह्मांडावलिमेखलः॥ भ्रूक्षेपदत्तलक्ष्मीको भद्रो भर्गो भयापहः॥ ५॥ भगवान्भक्तिसुलभो भूतिदो भूतिवर्द्धनः
भव्यो भूतालयो भव्यदाता भ्रूमध्यगोचरः॥ ६॥ मंत्रो मंत्रपतिर्मंत्री मदमत्तो महोन्नतः॥ मेखलावान्मदगतिर्मतिमान्मदिरेक्षणः॥ ७॥ महाबलो महावीर्यो महा
प्राणो महामना॥ यज्ञो यज्ञपतिर्यतिर्यज्ञगोप्ता यज्ञफलप्रदः॥ ८॥ यशस्करो योगगम्यो याज्ञिको याजकप्रियः रम्यो रसप्रियो रम्यो रंजको रावणार्चितः॥ ९॥
राज्यरक्षाकरो रत्नगर्भो राज्यसुखप्रदः॥ लक्षो लक्षपतिर्लक्ष्यो लयस्थो लड्डुकप्रियः॥ १०॥ लासप्रियो लास्यपरो लाभकृल्लोकविश्रुतः॥ वरेण्यो वह्निवदनो वं
द्यो वेदांतगोचरः॥ ११॥ विकर्ता विश्वतश्चक्षुर्विधाता विश्वतोमुखः॥ वामदेवो विश्वनेता वज्रिवज्रनिवारणः॥ १२॥ विवस्वद्बंधनो विश्वाधारो विश्वे
श्वरप्रभुः॥ शब्दब्रह्म शमप्राप्यः शंभुभक्तिगणेश्वरः॥ १३॥ शास्ता शिखाग्रनिलयः शरण्यः शिखरीश्वरः॥ षडर्तुकुसुमस्रग्वी षडाधारः षडक्षरः॥ १४॥
संसारवैद्यः सर्वज्ञः सर्वभेषजभेषजं॥ सृष्टिस्थितिलयक्रीडः सुरकुंजरभेदनः॥ १५॥ सिंदूरितमहाकुंभः सदसद्व्यक्तिदायकः॥ साक्षी समुद्रमथनः स्वयंवे

घस्वदक्षिणः ॥१६॥ स्वतंत्रः सत्यसंकल्पः सामगानरतः सुखी ॥ हस्तो हस्तिपिशाची शो हवनं हव्यकव्यभुक् ॥१७॥ हव्यं हुतप्रियो हृष्टो हृल्लेखामंत्रमध्यगः ॥ क्षेत्राधिपः क्षमाभर्त्ता क्षमापरपरायणः ॥१८॥ क्षिप्रक्षेमकरो क्षेमानंदः क्षोणीसुरद्रुमः ॥ धर्मप्रदोर्थदः कामदाता सौभाग्यवर्द्धनः ॥१९॥ विद्याप्रदो विभवदो भुक्तिमुक्तिफलप्रदः ॥ आभिरूप्यकरो वीरः श्रीप्रदो विजयप्रदः ॥२०॥ सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः ॥ मेधादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः ॥२१॥ प्रतिवादिमुखस्तंभो दुष्टचित्तप्रसादनः ॥ पराभिचारशमनो दुःखभंजनकारकः ॥२२॥ लवस्त्रुटिकलाकाष्ठानिमेषः तत्परक्षणः ॥ घटीमुहूर्त्तप्रहरो दिवानक्तमहर्निशं पक्षो मासोयनं वर्षं युगं कल्पो महालयः ॥ राशिस्तारा तिथिर्योगो वारं करणमंशकं ॥ लग्नं होरा कालचक्रं मेरुः सप्तर्षयो ध्रुवः राहुर्मंदः कवि ॥ जीवो बुधो भौमः शशी रवीः ॥२३॥ कालः सृष्टिः स्थितिर्विश्वं स्थावरं जंगमं च यत् ॥ भूरापोग्निर्मरुद्व्योमाहंकृतिः प्रकृतिः पुमान् ॥२४॥ ब्रह्मा विष्णुः शिवो रुद्र ईशः शक्तिः सदाशिवः ॥ त्रिदशाः पितरो सिद्धाः यक्षाः स्मिरक्षकिंनराः ॥२५॥ साध्या विद्याधरा भूता मनुष्याः पशवः खगा समुद्राः सरितः शैला भूतभव्यभवोद्भवः ॥२६॥ सांख्यं पातंजलं योगः पुराणानि श्रुतिः स्मृतिः ॥ वेदांगानि सदाचारो मीमांसा न्यायविस्तरः ॥२७॥ आयुर्वेद धनुर्वेदो गांधर्वं काव्यनाटकं ॥ वैखानसं भागवतं सत्वतं पांचरात्रि

कं ॥ ३० ॥ शैवंपाशुपतंकालमुखंभैरवशासनं ॥ शाक्तंवैनायकंसौरंजैनमार्हतसंहिता ॥ ३१ ॥ सदसद्व्यक्तमव्यक्तंसचेतनमचेतनं ॥ बंधोमोक्षोसुखभोगोयोगःसत्यं
मनुर्महान् ॥ ३२ ॥ स्वस्तिहुंफट्स्वधास्वाहाश्रौषट्वौषडानमः ॥ ज्ञानंविज्ञानमानंदोबोधःसंवित्सुखंशमः ॥ ३३ ॥ एकरएकाक्षराधारएकाक्षरपरायणः ॥ एकाग्र
धीरेकवीरएकानेकस्वरूपधृक् ॥ ३४ ॥ द्विरूपोद्विभुजोद्व्यक्षोद्विरदोद्वीपरक्षक ॥ द्वैमातुरोद्विवदनोद्वंद्वहीनोद्वयातिग ॥ ३५ ॥ त्रिधामात्रिकरस्त्रेतात्रिवर्गफ
लदायकः ॥ त्रिगुणात्मात्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः ॥ ३६ ॥ चतुर्बाहुश्चतुर्दंतश्चतुरात्माचतुर्मुखः ॥ चतुर्वर्गोपायमश्चतुर्वर्णाश्रमाश्रयः ॥ ३७ ॥ चतुर्वि
र्गोपायमश्चतुर्वर्णाश्रमाश्रयः ॥ ३७ ॥ चतुर्विधवचोवृत्तिपरिवृत्तिप्रवर्तक ॥ चतुर्थीपूजनप्रीतोचतुर्थीतिथिसंभवः ॥ ३८ ॥ पंचाक्षरात्मापंचात्मापंचास्यःपंचकृत्य
कृत् ॥ पंचाधारःपंचवर्णःपचाक्षरपरायणः ॥ ३९ ॥ पंचतालःपंचकरःपंचप्रणवभावित ॥ पंचब्रह्ममयस्फूर्तिःपंचावरणवारितः ॥ ४० ॥ पंचभक्ष्यप्रियःपंच
बाणःपंचशिवात्मकः ॥ षट्कोणपीठःषट्चक्रधामाषड्ग्रंथिभेदकः ॥ ४१ ॥ षडंगध्वांतविध्वंसीषडंगुलमहाह्रदः ॥ षण्मुखःषण्मुखभ्राताषट्शक्तिपरितः ॥ ४२ ॥ षड्वै
रिवर्गविध्वंसीषडूर्मिभयभंजनः ॥ षट्तर्कदूरःषट्कर्माषड्गुणःषड्रसाश्रयः ॥ ४३ ॥ सप्तपातालचरणःसप्तद्वीपोरुमंडलः ॥ सप्तस्वर्लोकमुकुटःसप्तसप्तिवरप्रदः

॥४४॥ सप्तांगराज्यसुखदः सप्तर्षिगणमंडितः ॥ सप्तछंदोनिधिः सप्तहोता सप्तस्वराश्रयः ॥४५॥ सप्ताब्धिकेलिकासारः सप्तमातृनिषेवितः ॥ सप्तछंदोमोदमदः सप्तछं-
दोमखप्रभुः ॥४६॥ अष्टपीठोपपीठश्रीरष्टमातृसमावृतः ॥ अष्टभैरवसेव्योष्टवसुवंद्योष्टमूर्तिभृत् ॥४७॥ अष्टचक्रस्फुरन्मूर्तिरष्टद्रव्यहविःप्रियः ॥ नवनागासनाध्या-
सीनवनिध्यनुशासिता ॥४८॥ नवद्वारपुराधारो नवद्वारनिषेवितः ॥ नवनारायणस्तुत्यो नवदुर्गानिषेवितः ॥४९॥ नवनाथमहानाथो नवनागविभूषणः ॥ नवरत्नवि-
चित्रांगो नवशक्तिशिरोधृतः ॥५०॥ दशात्मको दशभुजो दशदिक्पतिवंदितः ॥ दशाध्यायो दशप्राणो दशेंद्रियनियामकः ॥५१॥ दशाक्षरमहामंत्रो दशाशाव्यापिवि-
ग्रहः ॥ एकादशादिभीरुद्रैस्तुत एकादशाक्षरः ॥५२॥ द्वादशोद्दंडदोर्दंडो द्वादशांतनिकेतनः ॥ त्रयोदशभिदाभिन्नविश्वेदेवाधिदैवतं ॥५३॥ चतुर्दशेंद्रवरदः चतुर्दशम-
नुप्रभुः ॥ चतुर्दशादिविद्याढ्यश्चतुर्दशजगत्प्रभुः ॥५४॥ सामपचदशः पचदशीशीतांशुनिर्मलः ॥ षोडशाधारनिलयः षोडशः स्वरमातृकः ॥५५॥ षोडशांतपदावासः
षोडशेंदुकलात्मकः ॥ कलासप्तदशी सप्तदशः सप्तदशाक्षरः ॥५६॥ अष्टादशद्वीपपतिरष्टादशपुराणकृत् ॥ अष्टादशौषधीसृष्टिरष्टादशविधिस्मृतः ॥५७॥ अष्टा-
दशलिपिव्यष्टिसमष्टिज्ञानकोविदः ॥ एकविशतिपुमानेकविंशत्यंगुलपल्लवः ॥५८॥ चतुर्विंशतितत्वात्मा पंचविंशाख्यपूरुषः ॥ सप्तविंशतितारेशः सप्तविंश-

निरर्गलः ॥ ५९ ॥ द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः ॥ षट्त्रिंशतत्वसंभूतिरष्टत्रिंशत्कलेय ॥ ६० ॥ द्विपंचाशद्वपुःश्रेणुत्रिषष्ट्यक्षरसंश्रय । नमदेकोनपंचाशन्मरुद्वर्गनि
योगकृत ॥ ६१ ॥ पंचाशदक्षरश्रेणीपंचाशद्रुद्रविग्रहः ॥ पंचाशद्विष्णुशक्तीशः पंचाशन्मातृकालय ॥ ६२ ॥ चतुःषष्टिमहासिद्धियोगिनीवृंदवंदितः ॥ चतुःषष्ट्यर्णनिर्णेता
चतुःषष्टिकलानिधिः ॥ ६३ ॥ अष्टषष्टिमहीतीर्थक्षेत्रभैरवभावनः ॥ चतुर्नवतिमंत्रात्मा षण्णवत्याधिकप्रभुः ॥ ६४ ॥ शतानंदः शतधृतिः शतपत्रायतेक्षणः ॥ शता
नीकः शतमखः शतधारवरायुधः ॥ ६५ ॥ सहस्रपत्रनिलयः सहस्रफणिभूषणः ॥ सहस्रशीर्षापुरुषः सहस्राक्षसहस्रपात् ॥ ६६ ॥ सहस्रनामसंस्तुत्यः सह
स्राक्षबलापह ॥ दशसहस्रफणिभृत्फणिराजकृतासन ॥ ६७ ॥ अष्टाशीतिसहस्राणिमहर्षिस्तोत्रयंत्रित ॥ लक्षाधीशप्रियाधारो लक्षाधारमनोमयः ॥
६८ ॥ चतुर्लक्षजपप्रीतो चतुर्लक्षप्रकाशकः ॥ चतुराशीतिलक्षाणां जीवदेहेष्ववस्थिता ॥ कोटिसूर्यप्रतीकाशः कोटिचंद्रांशुनिर्मलः ॥ शिवाभवाद्युष्ट
कोटिविनायकधुरंधरः ॥ ७० ॥ सप्तकोटिमहामंत्रमंत्रितावयवद्युतिः ॥ त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः ॥ ७१ ॥ अनंतशक्तिशस्त्रास्त्रैत्यनंतमुनिसं
स्थितः ॥ अनंतनामानंतश्रीरनंतसौख्यदः ॥ ७२ ॥ इति वैनायकं नाम्नां सहस्रमिदमीरितं ॥ एतद्ब्राह्मे मुहूर्ते यः पठेत्प्रत्यहं नरः ॥ ७३ ॥ करस्थं तस्य सकल

मैहिकामुष्मिकं फलं ॥ आयुरारोग्यमैश्वर्यं धैर्यं शौर्यं बलं यशः ॥ ७४ ॥ मेधाप्रज्ञाधृतिः कांतिः सौभाग्यमतिरूपिता ॥ सत्यं दया क्षमा शांतिर्दाक्षिण्यं धर्मशीलता ॥ ७
॥ ७५ ॥ ज्ञानं विज्ञानमास्तिक्यं स्थैर्यं विश्वानिशायिना ॥ धनधान्यादिवृद्धिश्च सकृदस्य जपाद्भवेत् ॥ ७६ ॥ वश्यं चतुर्विधं विश्वं जपादस्य प्रजायते ॥ धर्मार्थकाममो-
क्षाणामनायासेन साधनं ॥ ७७ ॥ राज्ञो राजकलत्रस्य राजपुत्रस्य मंत्रिणः ॥ जप्यते यस्य वश्यार्थं स दासस्तस्य जायते ॥ ७८ ॥ शाकिनीडाकिनीरक्षोयक्षग्रहभयापहं
साम्राज्यसुखदं सर्वसपत्नमदमर्दनं ॥ ७९ ॥ परकृत्याप्रशमनं परचक्रविमर्दनं ॥ संग्रामरंगे सर्वेषामिदमेकं जयावहं ॥ ८० ॥ सर्ववंध्यात्वदोषघ्नं गर्भरक्षैककार-
णं ॥ पठ्यते प्रत्यहं यत्र स्तोत्रं गणपतेरिदं ॥ ८१ ॥ देशे तत्र न दुर्भिक्षमीतयो दुरितानि च ॥ न तद्गेहं जहाति श्रीर्यत्रायं पठ्यते स्तवः ॥ ८२ ॥ क्षयकुष्ठप्रमेहार्शोभगंदरवि-
सूचिका ॥ गुल्मप्लीहानवल्मीकमतिसारं महोदरं ॥ ८३ ॥ कासं श्वासमुदावर्तं शूलं शोफामसरुक्ज्वरं ॥ शिरोरोगं वमिं हिक्कां गंडमालामरोचकं ॥ ८४ ॥ वातपित्तक-
फद्वंद्वत्रिदोषजनितं ज्वरं ॥ आगंतुविषमं शीतमुष्णं चैकाहिकादिकं ॥ ८५ ॥ ऐकाहिकद्व्याहिकं च तथा त्रिदिवसादिकं ॥ इत्याद्युक्तमनुक्तं वा रोगदोषादिसं-
भवं ॥ ८६ ॥ सर्वं प्रशमयत्याशु स्तोत्रस्यास्य सकृज्जपात् ॥ प्राप्यते स्य जपात्सिद्धिः स्त्रीशूद्रपतितैः सकृत् ॥ ८७ ॥ सहस्रनाममंत्रोयं जपितव्यः शुभाप्तये ॥ महागण-

पतिः स्तोत्रं सकामः प्रजपेदिदं ॥ ८८ ॥ इछया सकलान्भोगानुपभुज्येह पार्थिवान् ॥ मनोरथफलैर्दिव्यैः व्योमयानैर्मनोरमैः ॥ ८९ ॥ चंद्रेंद्रभास्करोपेंद्रब्रह्मशर्वादिसद्मसु ॥ का
मरूपः कामगतिः कामदः कामईश्वरः ॥ ९० ॥ भुक्त्वा यथेप्सितान्भोगानभीष्टैः सहबंधुभिः ॥ गणेशानुचरो भूत्वा गणेशो गणपतिप्रियः ॥ ९१ ॥ नंदीश्वरादिसाम्यं च नंदितः सकलै
र्गणैः शिवाभ्यां कृपया पुत्रनिर्विशेषं च लालितः ॥ ९२ ॥ शिवभक्तः पूर्णकामो गणेश्वरवरात्पुनः ॥ जातिस्मरो धर्मपरः सार्वभौमोभिजायते ॥ ९३ ॥ निष्कामस्तु जपेन्नित्यं भ
क्त्या विघ्नेशतत्परः ॥ योगसिद्धिं परां प्राप्य ज्ञानवैराग्यसंयुतं ॥ ९४ ॥ निरंतरे निराबाधे परमानंदसंज्ञिते ॥ विश्वोत्तीर्णे परे पूर्णे पुनरावृत्तिवर्जिते ॥ ९५ ॥ लीनो वैनायके धाम्नि
रमते न निवर्तते ॥ इदं प्रजपितं स्तोत्रं पठितं श्रावितं श्रुतं ॥ ९६ ॥ व्याकृतं चिंतितं ध्यातं विमृष्टमथ वंदितं ॥ ईहामुत्र च सर्वेषां विश्वैश्वर्यप्रदायकं ॥ ९७ ॥ स्वच्छंदचारिणाप्येष
येन संधार्यते स्तवः ॥ स रक्ष्यः शिवोद्भूतैर्गणैरध्यष्टकोटिभिः ॥ ९८ ॥ लिखितं पुस्तकं स्तोत्रं मंत्रभूतं प्रपूजयेत् ॥ तत्र सर्वोत्तमा लक्ष्मिः संनिधत्ते निरंतरं ॥ ९९ ॥ दानैर
शेषैरखिलैर्व्रतैश्च तीर्थैरशेषैरखिलैर्मखैश्च ॥ न तत्फलं विंदति यद्गणेशसहस्रनामस्मरणेन सद्यः ॥ १०० ॥ एतन्नाम्नां सहस्रं पठति दिनमणौ प्रत्यहं प्रोज्जिहाने सायं
मध्यंदिने वा त्रिषवणमथवा संततं वा जनो यः ॥ स स्यादैश्वर्यधुर्यः प्रभवति वचसां कीर्तिमुच्चैस्तनोति दारिद्र्यं हंति विश्वं वशयति सुचिरं वर्द्धते पुत्रपौत्रैः ॥ १ ॥ अकिंचनोप्य

॥गणे०॥
॥६५॥

कचिनोनियतोनियताशनः॥मजपंश्चतुरोमासान्गणेशार्चनतत्परः॥दरिद्रतांसमुन्मूल्यसप्तजन्मानुगामपि॥लभतेमहतींलक्ष्मीमित्याज्ञापरमेश्वरी॥३॥आयुष्यंवी
तरोगकुलमतिविपुलसंपदःश्रोणिपानांकीर्तिःपुरायावदातामरणानिरश्मिनवाकान्तिरव्याजभव्या॥पुत्रावंतःकलत्रंगुणवदभिमतंयद्यदन्यच्चतत्तन्नित्यंयःस्तोत्रमेत
त्पठतिगणपतेस्तस्यहस्तेसमस्तं॥४॥गणंजयोगणपतिर्हेरंबोधरणीधरः॥महागणपतिर्यक्षेश्वरःक्षिप्रप्रसाधनः॥५॥अमोघसिद्धिरमृतोमंत्रश्चिंतामणिर्निधिः॥
सुमंगलोबीजमाशापूरकोवरदःशिवः॥६॥काश्यपोनंदनोवाचासिद्धोढुंढिविनायकः॥मोदकैरेभिरत्रैकविंशत्यानामभिःपुमान्॥७॥यःस्तौतिमद्गतमनाममारा
धनतत्परः॥स्तुतेनाम्नांसहस्रेणतेनाहंनात्रसंशयः॥८॥नमोनमःसुरवरपूजितांघ्रयेनमोनमोनिरुपममंगलात्मने॥नमोनमोविपुलदयैकसिद्धयेनमोनमःकरि
कलभाननायते॥९॥किंकिणीगणरणितचरणःप्रकटितगुरुमतिचारुकरणः॥मदजललहरीकलितकपोलःशमयतुदुरितंगणपतिनामा॥१०॥इतिश्री
मद्गणेशपु०उ०ईश्वरगणेशसंवादेसहस्रनामस्तोत्रकथनं॥[illegible]॥ध्यायः॥नाम्नांसहस्रेसंप्रोक्तेप्रसन्नेतुगजानने॥ततःकिमकरोद्ब्रह्मन्हरस्तत्कथयस्वमे॥१॥ब्रह्मा॥
गणेशवरदानेननाम्नांचैवोपदेशतः॥मत्तश्शंकरोनुत्वज्जगर्जेचमहास्वनः॥२॥आहूयसगणान्देवान्युद्धायचसमादिशत्॥तेचहर्षेणमहतायुयुर्देवाःशिवा

॥राम॥
॥६५॥

निकं ॥ ३ ॥ ब्रह्माकुवेरोथपुरंदरोग्निर्वायुश्चसोमोवरुणोयमश्च ॥ गंधर्वयक्षाग्रहकिंनराश्चसर्वैर्नमस्कृत्यशिवंस्तुवंतः ॥ ४ ॥ देवाऊचुः ॥ महादेवजगन्नाथजगदानं
दकारक ॥ त्वयाहतंमहादैत्यंकदाद्रक्ष्यामहेवयं ॥ ५ ॥ स्थानभ्रष्टावयंतेनकृतनाविश्वविघातिना ॥ एवंदेववचःश्रुत्वापिनाकीनिर्ययौमुदा ॥ ६ ॥ गणौघंमनसा
आपन्युद्धायकृतनिश्चयः ॥ वेगेनभवनंप्राप्यदेवगंधर्वसंयुतः ॥ ७ ॥ तावज्ज्ञदैत्यचारैस्तुकृतांतःसनिरूपितः ॥ आगतासुरसैन्येनयुद्धायगिरिजापतिः ॥ ८ ॥ तस्यसै
न्यान्यनंतंजशस्त्रैरस्त्रैश्चकंचुकैः ॥ सचदैत्योमहानादीयुद्धभूषणभूषितः ॥ ९ ॥ वीरान्नानंदयामासवासःस्वर्णभूषणैर्धनैः ॥ अनेकयानसंस्थेषुयोधेषुत्रिपुरं
स्वयं ॥ १० ॥ आरुरोहमहादैत्योनादयह्निन्विदिशोदश ॥ ततोयुद्धंसमभवत्तेनयोरुभयोर्महत् ॥ ११ ॥ शस्त्रैर्नानाविधैर्वीराणांमर्मभेदिभिरायसैः ॥ असृङ्नदीप्रवा
होभून्मार्गरोधनकारकः ॥ १२ ॥ शस्त्राहतावभुर्योधाःपुष्पिताइवकिंसुकाः ॥ केचिच्चहृढवैरेणजीवग्राहममारयन् ॥ १३ ॥ केचित्कचेषुधृत्वैवशिरोधिंचिच्छिदुर्बला
त् ॥ धावंतेरथिवीराणाअश्वानांकरिणामपि ॥ १४ ॥ अंघ्रिपातभवोरेणुर्व्यानशेरोदसीक्षणात् ॥ अंधकारेघोरतरेप्राज्ञायतनकिंचन ॥ १५ ॥ चक्रुरेवतदा
द्वीरानानाविधामृधं ॥ जीविताशांपरित्यज्यमरणोकृतनिश्चयाः ॥ १६ ॥ अहर्षयंतमृतादेवागतेरजसिवायुना ॥ विद्रुतेसुरसैन्येचदैत्यसैन्येचहर्षिते ॥ १७

आययौसमरश्लाघीवज्रहस्तःपुरंदरः॥शतकोटिंनिरीक्ष्यैवबहुदुद्रुवुःदैत्यदानवाः॥१८॥सवज्रपातैरसुरांश्चूर्णयामासवज्रभृत्॥नसमुज्जीवितंतेनेतुचेंद्रवज्र
महारत॥१९॥केचिच्चभग्नचरणाःकेचिद्भग्नशिरोधराः॥केचिद्विदीर्णजठराच्छिन्नस्कंधभुजापरे॥२०॥केषांचिदुरसोभिन्नाजंघासुचहतापरे॥छिन्नगुल्फा
परेपेतुर्मिषानेतुरथापरे॥२१॥छिन्नाश्वानांचवीराणांवाजिनांरथिनांतथा॥निहतानामसृक्पातैर्जज्ञिरेनिम्नगाबहून्॥२२॥उत्साहवर्द्धनास्तेषांवीराणां
जयकांक्षिणां॥ततःशनैर्गर्जमानोददर्शत्रिपुरासुर॥२३॥निहतंबहुधासैन्यंशक्रंयोद्धुमथाययौ वभाषशक्रहहेवकिमर्थमर्तुमिच्छसि॥२४॥अत्र
थैहियुद्धाज्जीवस्त्वंनप्रहंहन्मिवासवः॥कातेशक्तिर्मयायुद्धंकर्तुंतवशचीपते॥२५॥अजःसिंहेनकिंयुद्धंकरिष्यतिवदस्वमे॥एहियुध्यस्वशाकिंचि
न्नोचेद्गच्छयथासुखं॥२६॥एवमुक्तेस्थितेशक्रेववर्षसायकान्बहून्॥सज्यंकृत्वाधनुर्दैत्योदेवसेनामताडयत्॥२७॥एकस्मान्मंचिताद्वाणादसंख्याता
ययुःशराः॥मर्द्दंतोदेवसैन्येनरोदसीसमपूरयन्॥२८॥अंधकारःपुनरभूत्वाणजालैर्निरंतरं॥तद्वाणैरपिगर्जंतंयुध्यंतंनाभ्यरोचयत्॥२९॥मनसापूज
यच्छंभुंतस्यदैत्यस्यपौरुषं॥३०॥एतस्मिन्नंतरेतत्रनारदोद्रष्टुमाययौ॥३०॥पूजितःप्राहदेवेंद्रंशुभ्रंपुण्यनीललोहितं॥नारदउवाच॥त्वयाचिंतानकर्त

यास्त्रिपुरस्यवधंप्रति॥३१॥वक्ष्येतस्यवधोपायंतंकुरुष्वमहेश्वरः॥तेनपूर्वंतपोकारिपुष्करेब्रह्मणोपिहि॥३२॥आराधितोगणापतिस्तस्मैसर्ववांछितं॥यद्यतेनदत्तंदेवो
दत्तवानविचारितं॥३३॥पुरत्रयंकामगमगममेकबाणाग्निनंमहत्॥महद्भक्तिविहीननतदभेद्यसर्वनिर्जरैः॥३४॥सयेवमुक्तवान्तुल्यंशरेणैकेनयस्तव॥पुरत्रयंभेत्स्यते
तेनतस्मान्मृत्युमवाप्स्यसि॥३५॥क३०॥एवमुक्त्वागतेतस्मिन्नारदेमुनिसत्तमे॥मूर्छितान्विबुधाञ्छर्वांसावधानान्तथाकरोत॥३६॥सस्मारभमुखंवाक्यंस्मारितो
नारदेनतु॥महाप्रयत्नमारेभेदैत्यराजवधायसः॥३७॥चेतसासर्वनाशाययज्ञकोदेवोनिजच्छया॥रथंकुरूपंशशिसूर्यचक्रयन्तारमिंदीवरजंचकार॥३८॥धनुर्गि
रींद्रंशरमच्युतंसधुर्याग्निवायुर्जगदीशः॥आचम्यदेवमनसाविमनसाविचिंत्यतेनोपदिष्टंचजजापनाम्नां॥३९॥सहस्रमेकाक्षरमंत्रयुक्तंममत्रयंतेनपि
नाकमुग्रं॥अमंत्रयन्महाबाणंविष्णुरूपंसदाशिवः॥४०॥चकंपेधरणीशैघ्रोवनानिगिरयोपिच॥४१॥चम्रमुःखगणाःसर्वेचुकूजुश्चमहारवाः॥शब्देनाजगत्
स्यापिविभ्रान्ताःसुरमानुषाः॥४२॥अमुंचंतयदाबाणंतदादग्धंनभस्तलं॥भूमंडलंसपातालंज्वालामालाभिरंजसा॥४३॥दृष्ट्वापपातदैत्येंद्रःससैन्यःपुरसंभ्र
मः॥जवनागाच्छरःसोग्रोदहत्संहृत्पुरत्रयं॥४४॥दैत्यदेहगतंतेजोभर्गदेहलयंगतं॥पश्यतांसर्वदेवानांदैत्यदानवरक्षसां॥४५॥ततोन्तरिक्षेवागासीन्मुक्तो

॥ गणेठ ॥ रैस्याशिवाहनः॥ ननर्त्तनुष्टुवुर्देवामुनयोपि त्रिलोचन॥ ४६॥ जगुर्गंधर्वनिचयाश्चारणाश्चकिंनतत्पराः॥ ननृतुश्चाप्सरःसंघाः किंन्नरावाद्यवादकाः॥ ४७॥ मुमुचुः पुष्प
॥ ६० ॥ वर्षाणि नारदाद्याः सुरर्षयः॥ ययुः शिवाज्ञयादेवाः स्वंस्वंस्थानं निरामयाः॥ ४८॥ नमस्कृत्य महेशानं त्रिपुरासुरघातिनं॥ मुनयोपि निजान्देशान्स्वस्वानुष्ठानतत्पराः॥
॥ ४९॥ आसंस्तस्मिन्हते दैत्ये वेदवेदांगपाठिनः॥ अग्निहोत्राणि यज्ञांश्च दानानि च व्रतानि च॥ ५०॥ चक्रुः सर्वजनाभूयोपुनरुत्साहसंयुताः॥ शेषादिगणपस्कं
दैः सर्वैः पारिषदैरपि॥ ५१॥ कृतनर्तनस्त्रुवक्षेपविभज्यचमहारथ॥ जयशब्दैस्तूर्यशब्दैर्देवदुंदुभिनिस्वनैः॥ ५२॥ अलंकृतं शैलराजं कैलासमुदितो ययौ॥ त्रिपुरारिरिति
स्पष्टं ततो नामास्य पप्रथे॥ ५३॥ एवं महागणपतिर्मंत्रसामर्थ्यमेव च महत्त्वनाम्नामपि च प्रभावो यं निरूपितः॥ ५४॥ नविज्ञातो मदन्येन कस्मापि न निवेदितः॥ पठ
नाच्छ्रवणादस्य सर्वकामफलं लभेत्॥ ५५॥ इति श्रीमहागणेशपु० उ० त्रिपुरासुरवधो॥ ४७॥ व्यासउ०॥ श्रुतं मया महाख्यानं त्रिपुरस्य वधाश्रयं॥ तथापि श्रोतुमि
च्छामि कुत्र स्थिता जगदंबिका॥ १॥ कथमाविर्बभूवैषा तिथौ राघः क्व देश्यराट्॥ एतन्नस्सर्वं सविस्तारं कथयस्व पितामह॥ २॥ कोठ॥ बाहुले पौर्णमास्यां तु समायं दग्धो म ॥ राम ॥
हासुरः॥ दिवायुद्धं महाघोरं मार्गेवचर्षीणं चयत्॥ ३॥ यतोर्चितः सुरैः सर्वैर्जयशाली सुरारिहा॥ अतस्तस्यां दीपदानं कुर्वंतु भुवि मानवाः॥ ४॥ तस्यां स्नानं च दानं च ॥ ६० ॥

जपहोमादिकंचयत्॥ बहुलंजायतेयस्मात्तस्मात्साबाहुलीस्मृता॥५॥ तस्यांयेतुनकुर्वंतित्रिपुरारेर्महोत्सवं॥ नलभंतेनयंक्वापिदग्धपुरापापमवंतिते॥६॥ अतलस्यांपौर्ण
मास्यांप्रातरर्चमास्यांमानरश्चेनियेशिवं॥ निशियत्नैःकृतंपापविलयंप्रतिपद्यते॥७॥ आजन्मतःकृतंपापमध्याह्नार्चनतस्तथा॥ सप्तजन्मार्जितंपापंप्रदोषार्चनतो
मुने॥८॥ आविर्भावंशिवायास्त्वंकथ्यमानममपाच्छृणु॥ तस्यमृतुंशिवाद्याभयारंनहिताशिवा॥९॥ आविरासीज्जगन्मातानाहिमाचलगुहामुखात्॥ ददर्शपर्व
तंघोरंसिंहव्याघ्रमृगाकुलं॥१०॥ अपश्यंतीशिवंसानुविरहाकुलमानसा॥ विललापभृशंभीताहाहाहंतशिवेतिच॥११॥ कथंमांनविजानीषेसर्वज्ञःसन्सदाशिवः
वनेएकाकिनीघोरेक्रंदंतीकुररीमिव॥१२॥ कदामेदर्शनंतेस्यात्किंमाविस्मृतवानसि॥ शक्तानजीवितंधर्तुंसोढुंवाविरहंहर॥१३॥ नानत्वमपिकुत्रासिनमेशोकं
शृणोषिकिं॥ त्वांविनाशरणंकंवायामिकिंवाकरोम्यहं॥१४॥ योजयस्वपुनर्मांत्वंशिवेनचशिवेनच॥ इदानींपुनरुत्सन्नांजानीहीजटराननव॥१५॥ घोरेनमेवनी
द्रंमेगवेशयमसदाशिवं॥ नोचेद्देहपरित्यागंभृगोदस्मात्करोम्यहं॥१६॥ कौ०॥ एवंरुदंतींसास्तत्याःश्रुत्वानागिरसुतम॥ न्यवेदयद्धिमवतेकश्चिल्लागस्यधीवरः॥१७॥
॥धीवर०॥ काचिन्नितंबिनीभव्यासर्वाभरणभूषिता॥ ताटंकेबिभ्रतीश्रोत्रोर्मंडलेइवभास्वतः॥१८॥ नानारत्नलसद्दीप्तिमुकुटंमस्तकेशुभे॥ लसन्तोवेनुचतुष्को

णामुक्तायोऽशशोभितं ॥१९॥ पुष्यंकांचनरत्नानिमस्यैकमंगुलीयकं ॥ लसत्कांचनरत्नाढ्यंमुक्तादामविलंवितं ॥२०॥ सीमन्तोन्नगतंचारुनासाग्रावकमौक्ति
कं ॥ अंगदेचारुणीबाह्वोर्हेरत्नपोर्वलयानिच ॥२२॥ मुक्ताफलमयींमालांलसत्कंचुकसंस्थितां ॥ हेमरत्नमयींकांचीकटौक्षौमावृतेशुभां ॥२३॥ गुल्फयोश्रृं
खलेहैमेसिंजच्चारुसुनूपुरे ॥ पादांगुलीष्वपिपृथक्रत्नभूषणमुत्तमं ॥२४॥ एवंसर्वानःवधांगीरुदंतीविह्वलाभृशं ॥ दृष्ट्वाहृष्टनमोबुक्किगृह्णतीचतवामिधां २
॥२४॥ कौ० ॥ इत्थंनिशम्यहिमवांस्त्वरितस्तांसुतांययौ ॥ सात्वपहृतगर्भाभिर्वाग्भिस्तामवदत्सुधीः ॥२५॥ हिमवानुः ॥ किमसमर्थंशोचसेसुभ्रुस्त्वंहिस्थिरत्वं
नहेतुके ॥ सर्वलक्षणसंपूर्णेसर्वशक्तियुतेनये ॥२६॥ अकर्तुमन्यथाकर्तुमीशोमहेश्वरि ॥ अवाप्तसर्वकामेचसर्वमारापंनरंगते ॥२७॥ वियुक्तासिशिवेनत्वं
सबीनर्यामिरणाशिवे ॥ अथापियोजयिष्येत्वांशिवेनशिवकारिणा ॥२८॥ उत्तिष्ठेतिगृहीत्वातामायंयौनिजमंदिरं ॥ ननर्दयावतीतत्रदृष्ट्वामेनासुतासुता
न्विता ॥२९॥ निश्वासपरमाप्यासाच्छिवदृष्टसमुत्सुका ॥ उवाचपितरंनत्वासाधूपायंवदस्वमे ॥३०॥ येनेदानेनपोवापिदुष्करंशिवलब्धये ॥ करिष्येतमहं
नातपूर्ववनपउमं ॥३१॥ कौ० ॥ अवदज्जनकस्तांतुविचार्यमनसासहृत ॥ कार्यसिद्धिकरंशीघ्रमुपायंकथयामिते ॥३२॥ हिमवान ॥ शृणुपार्वतिवक्ष्यामिसा

धूपाय शिवासये॥ उपास्तिं विघ्नराजस्य धर्मार्थकाममोक्षदां॥ ३३॥ अनुष्ठितां महेंद्राद्यैर्देवैश्च नारदादिभिः॥ प्राप्ताश्च सिद्धयस्ताः शक्रादिपदलक्षणाः॥ ३४॥ अस्य
रणात् सिद्धिसामर्थ्यं प्राप्तं तस्य प्रसादतः॥ विष्णोश्चावनसामर्थ्यं दत्तं तेन महात्मना॥ ३५॥ शिवस्यापि च तेनैव सामर्थ्यं संहृतौ दृढं॥ शेषस्यापि च तेनैव सर्वविघ्नहरेण
च॥ ३६॥ धराधरणसामर्थ्यं दत्तं सर्वेश्वरेण हि॥ यस्य स्वरूपं न विदुर्ब्रह्माद्या मुनयोपि च ३७ वाचामगोचरो योसौ मनसो थाप्यगोचरः॥ गजाननस्वरूपेणावरिदृश्यो
यमीश्वरः॥ ३८॥ अनंतस्तेनैव रूपेण सर्वारंभेषु पूज्यते॥ तमुपास्व सर्वेषु मया मोक्षेन वर्त्मना॥ ३९॥ इति श्रीमहागणेशपु॰ उ॰ श्रेवाविर्भावो ना॥ ४०॥ पार्वत्युवा॥
दयानिधे गिरींद्र त्वं पितर्मे वद सत्वरं॥ उपासना गणेशस्य सर्वेशस्य जगद्गुरो॥ १॥ यथा शिवं सर्वसमन्वेत्य शिवं प्राप्स्यामि शाश्वतं॥ मृत्युलोकेपि लोकानामुपका
रो भविष्यति॥ २॥ हिमवान॥ तव स्नेहवशाद्देवि रहस्यं परमं शुभं॥ लोकानां चोपकाराय वक्ष्ये शृणुष्वैकचेतसा॥ ३॥ प्रत्यूषकाल उत्थाय नैऋतीं दिशिमाव्रजेत्
आच्छाद्य धरणीं पूर्वं तृणकाष्ठदलैरपि॥ ४॥ उर्वरां वर्जयेत्तत्र जन्तुसर्पांश्चैव बुद्धिमान॥ त्यक्त्वा मूत्रपुरीषे तु यथोक्तं शौचमाचरेत्॥ ५॥ दंतजिह्वाविशुद्धिं च कृत्वा
स्नानं ततो व्रजेत्॥ नदीं तडागं वापीं वा सरः कूपमथापि वा॥ ६॥ कृत्वा पूर्वं मलस्नानं मंत्रस्नानं ततश्चरेत्॥ मृदा वा चंदनेनापि तिलकं कुंकुमेन वा॥ ७॥ कुर्याद्वा

नेकसमीतुपरिधायशुभासने ॥ उपविश्यैकचित्तस्तुसर्वंनियमंसमाप्यच ॥ ८ ॥ मृत्तिकांसुंदरांस्निग्धांक्षुद्रपाषाणवर्जितां ॥ सुविशुद्धामवल्मीकांजलमिश्रांविमर्दयेत
॥ ९ ॥ कृत्वाचारुतरांमूर्तिंगणेशस्यशुभांस्वयं ॥ सर्वावयवसंपूर्णांचतुर्भुजविराजितां ॥ १० ॥ परश्वादियुधानीहदधानांसुंदरांघनां ॥ स्थाप्यपीठेततःप्राणमस्या-
स्यमेलयेत्सुधीः ॥ ११ ॥ पूजाद्रव्याणिसर्वाणिजलादीनिप्रयत्नतः ॥ अथगंधानक्षतांश्चरक्तपुष्पाणिगुग्गुलं ॥ १२ ॥ त्रिपंचसप्तभिःपत्रैर्युक्तदूर्वांकुरांश्चकुर्वीत
अष्टोत्तरशतंनीलांछेत्तानानीयसुंदरां ॥ १३ ॥ घृतदीपंतैलदीपंनैवेद्यंविविधंशुभं ॥ मोदकापूपलड्डुकान्नपायसंशर्करायुतं ॥ १४ ॥ सुसूक्ष्मंतंदुलान्नंचव्यंजनानि
बहूनिच ॥ सचंद्रपूगचूर्णाढ्यंखादिरादिसुसंयुतं ॥ १५ ॥ एलालवंगसंमिश्रंतांबूलंकेसरान्वितं ॥ जंबाम्रपनसादींश्चद्राक्षारंभाफलानिच ॥ १६ ॥ ततस्तुभवानीश्
नारिकेलानिचानयेत् ॥ बहुप्रकारमाणिक्यकांचनीदक्षिणांतथा ॥ १७ ॥ एवंसंभृतसंभारएकांतस्थलमास्थितः ॥ चैलाजिनकुशमयेआसनेचकृतासनः ॥ १८ ॥
भूतशुद्धिंप्रकुर्वीतप्राणानांस्थापनंतथा ॥ दिग्बंधपूर्वंदेवांश्चगणेशादीन्समेत्युत ॥ १९ ॥ अनर्वहिर्मातृकाश्चन्यसेद्गणसमागतः सन्निधानादिकामुद्रांदर्श-
येद्गुरुमार्गतः ॥ २० ॥ मंत्रन्यासंततःकृत्वाषडंगंन्यासमेवच ॥ पूजाद्रव्याणिसंप्रोक्ष्यततोध्यायेद्गजाननं ॥ २१ ॥ एकदंतंशूर्पकर्णंगजवक्त्रंचतुर्भुजं ॥ पाशांकुश

धरंदेवंमोदकान्विघ्ननकरे ॥२२॥ रक्तपुष्पमयामालांकंठेहस्तेपरांशुभां ॥ भक्तानांवरदंसिद्धिबुद्धिभ्यांसेवितंसदा ॥२३॥ सिद्धिबुद्धिप्रदंनॄणांधर्मार्थकाममोक्ष
द ॥ ब्रह्मरुद्रहरींद्राद्यैःसंस्तुतंपरमर्षिभिः ॥२४॥ ध्यानं ॥ आगच्छजगदाधारसुरासुरवरार्चित ॥ अनाथनाथसर्वज्ञगीर्वाणपरिपूजित ॥२५॥ आसनं ॥ ॥
स्वर्णसिंहासनंदिव्यंनानारत्नसमन्वितं ॥ समर्पितंमयादेवतत्रत्वंसमुपाविश ॥२६॥ पाद्यं ॥ देवदेवेशसर्वेशसर्वतीर्थाहृतंजलं ॥ पाद्यंगृहाणगणपगंधपुष्पाक्ष
तैर्युतं ॥२७॥ अर्घ्यं ॥ प्रवालमुक्ताफलपूगरत्नैस्तांबूलजांबूनदमष्टगंधैः ॥ पुष्पाक्षतैर्युक्तममोघशक्तेदत्तंमयार्घ्यंसफलीकुरुष्व ॥२८॥ आचमनं ॥ गंगादि
सर्वतीर्थेभ्यःसंचितंतोयमुत्तमं ॥ कर्पूरैलालवंगादिवारिचाचम्यतांविभो ॥२९॥ सुगंधतैलं ॥ चंपकाशोकबकुलमालतीमोगरादिभिः ॥ वासितंस्निग्धताहेतु
तैलंचारुप्रगृह्यतां ॥३०॥ पयस्ना॰ ॥ कामधेनुसमुद्भूतंसर्वेषांजीवनंपरं ॥ पावनंयज्ञहेतुश्चपयःस्नानार्थमर्पितं ॥३१॥ दधिस्ना ॥ धेनुदुग्धसमुद्भूतंशु
द्धंसर्वजनप्रियं ॥ मयानीतंदधिवरंस्नानार्थंप्रतिगृह्यतां ॥३२॥ हविः ॥ नवनीतसमुत्पन्नंसर्वसंतोषकारकं ॥ यज्ञांगदेवताहारोघृतंस्नानंसमर्पित ॥३३॥
॥ मधु ॥ रससारसमुद्भूतंसर्वतेजोविवर्द्धनं ॥ सर्वपुष्टिकरंदेवमधुस्नानार्थमर्पितं ॥३४॥ शार्करा॰ ॥ इक्षुसारसमुद्भूतंशर्करांसुमनोहरां ॥ मलापहारिणीं

तेगृहाण त्वमर्पितं ॥ ३५ ॥ गुडः ॥ सर्वमाधुर्यनाहेतुस्वादुः सर्वप्रियंकरः ॥ पुष्टिकृत्स्नानुमानीयगुड्स्सारमवोगुडः ॥ ३६ ॥ मधुपर्कं ॥ कांस्येकांस्येन पिहि
तं दधिमधुघृतं तथा ॥ मधुपर्को मयानीतः पूजार्थं प्रतिगृह्यतां ॥ ३७ ॥ शुद्धोदक॰ ॥ सर्वतीर्थात्हृतं तोयं मया प्रार्थनया विभो सुवासितं गृहाणेदं सम्यक्
स्नानं सुरेश्वरः ॥ ३८ ॥ वस्त्रं ॥ रक्तवस्त्रं युगं देवलोकलज्जानिवारणं ॥ अनर्घ्यमतिसूक्ष्मं च गृहाणेदं मयार्पितं ॥ ३९ ॥ यज्ञोपवीतं॰ ॥ राजतं ब्रह्मसूत्रं च
कांचकांचनं रत्नसंयुतं ॥ भक्त्योपपादितं देव गृहाण परमेश्वर ॥ ४० ॥ आभूषणं ॥ अनेकरत्नसंयुक्तं भूषणानि बहूनि च ॥ तत्तदंगेकाचनानि योजया
मि तवाज्ञया ॥ ४१ ॥ गंधं॰ ॥ अष्टगंधं समायुक्तं रक्तचंदनमुत्तमं ॥ द्वादशांगेषु ते देव लेपयामि कृपां कुरु ॥ ४२ ॥ अक्षतं॰ ॥ रक्तचंदनसमिश्रास्तंडुला
न्तिलकोपरि ॥ शोभायै व प्रदास्यामि गृहाण जगदीश्वर ॥ ४३ ॥ पुष्पं॰ ॥ नानापंकजपुष्पैश्च ग्रथितां पल्लवैरपि ॥ बिल्वपत्रयुतां मालां गृहाण सु
मनोहरां ॥ ४४ ॥ धूपं ॥ दशांगं गुग्गुलं धूपं सर्वसौगंधाकारकं ॥ सर्वपापक्षयकरं गृहाण त्वं मयार्पितं ॥ ४५ ॥ दीपं॰ ॥ सर्वज्ञ सर्वलोकेश तमोनाशन
मुत्तमं ॥ गृहाण मंगलं दीपं देवदेव नमोस्तु ते ॥ ४६ ॥ नैवेद्य ॥ नानापक्वान्नसंयुक्तं पायसं शर्करान्वितं ॥ नानाव्यंजनशोभाढ्यं शाल्योदनमनुत्तमं ॥ ४७

दधिदुग्धघृतैर्युक्तं लवंगैलासमन्वितं ॥ मरीचचूर्णसहितं क्वथितं वटकान्वितं ॥ ४८ ॥ राजिकाधान्यसंयुक्तं मेथीपीठं सतक्रकं ॥ हिंगुजीरककूष्माण्डैर्मरीचैर्माषपिष्टकैः
॥ ४९ ॥ संपादितैः सुपक्वैश्च भर्जितैर्वटकैर्युतं ॥ मोदकापूपलड्डुकशष्कुलीवटकादिभिः ॥ ५० ॥ पर्पटैश्च समायुक्तैर्नैवेद्यममृतान्वितं ॥ हरिद्राहिंगुलवणैः सहितं स-
यमुत्तमं ॥ ५१ ॥ ससामुद्गं गृहाणेमं भोजनं कुरु सादरं ॥ सुरूपं दीपितं तोयं सुगंधं च पिबेच्छया ॥ ५२ ॥ त्वयि तृप्ते जगत्तृप्तं नित्यतृप्ते महात्मनि ॥ उत्तरापोशनार्थं दत्तमितो-
यं सुवासितं ॥ ५३ ॥ मुखपाणिविशुद्ध्यर्थं पुनस्तोयं ददाम्यहं ॥ दाडिमं मधुरं निंबुजंबाम्रपनसादिकं ॥ ५४ ॥ द्राक्षारंभाफलं पक्वं कर्कंधूखर्जूरं फलं ॥ नारिकेरं च
नारंगं कलिंगमांजिरं तथा ॥ ५५ ॥ उर्वारुकं च देवेश फलान्येतानि गृह्यतां ॥ अवीरं ॥ अवीरं नामकं पुण्यं गंधि चारु प्रगृह्यतां ॥ ५ ॥ चारुशाल्मूरसंभूतं वं समस्ता-
रसमुद्भवं ॥ मुखपाणिविशुद्ध्यर्थं पुनस्तोयं ददामि ते ॥ ५६ ॥ गृहाण चंदनं चारु कर्णगोहृत्तं नं शुभं ॥ नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमं ॥ ५७ ॥ सीमंतभूष-
णं चूर्णं लाक्षारजितमस्तु ते ॥ तांबूलं ॥ सच्छदपूगचूर्णाढ्यं स्वाद्यखादिरसंयुतं ॥ ५९ ॥ एलालवंगसंमिश्रं तांबूलं केसरान्वितं ॥ दक्षिणा ॥ न्यूनातिरिक्तपूजायाः
संपूर्णफलहेतवे ॥ ६० ॥ दक्षिणां कांचनीं देव स्थापयामि तवाग्रतः ॥ ६१ ॥ सितवर्तीतैलधारकैर्जलजैः कुसुमैः शुभैः ॥ ग्रथितां सुंदरां मालां गृहाण परमेश्वर ॥ ६२ ॥

हिमिनाःश्वेनवर्णावापंचत्रिपगसंयुता॥दूर्वांकुरमयादनालएकविंशतिसंमिता॥एकविंशतिसंख्याकाकुर्यादेवप्रदक्षिणा॥६४॥पदेपदेतेदेवशानश्वंनुपानका
निमे॥औदुंबरेराजतेवाकांस्येकांचनसंभवे॥६५॥पात्रेप्रकल्पितानद्दीपागृहाणविघ्नवारण॥पंचार्त्तिपचदीपेश्वदीपितोपरमेश्वर॥६६॥चरुचंद्रप्रभंदीपं
गृहाणध्वांतवारणं॥यथास्यनेक्षतेभस्मनथापापंविनाशय॥६७॥स्तोत्रैर्नानाविधैःसूक्तैःसहस्रनामभिस्ततः॥उपविश्यपल्कवीनेनकृत्वास्थिरतरंमनः
॥६८॥दीनानाथदयानिधेसुरगणैःसंसेव्यमानद्विजैर्ब्रह्मेशानमहेन्द्रशेषगिरिजागंधर्वसिद्धैःस्तुतः॥सर्वारिष्टनिवारणैकनिपुणत्रैलोक्यनाथप्रभोम
किंमेसफलंकुरुष्वसकलानक्षात्वापराधान्मम॥६९॥इतिमूर्तिंसमभ्यर्च्यईडवत्सगणपत्यच॥जपेन्मंत्रंततोदेविसर्वसिद्धिप्रदायक॥७०॥इतिश्रीम
द्गणेशपु०पार्थिवपूजाविधि॥४९ पावमु०॥ अहमंत्रेनजानामिगिरीद्रतंवदस्वमे॥अनुग्रहंगणेशस्ययेनयामिशिवंशिवे॥१॥हिमवा०॥मंत्रानाना
विधादेविनानासिद्धिप्रदायकाः॥असंख्यानागणेशस्यकांश्चित्तेप्रवदामिते॥२॥कृत्वापद्मासनसम्यक्संयम्यांगानिसर्वशः॥कृतन्यासविधिःपश्चा
ज्जपंकुर्यान्निजेच्छया॥३॥एकाक्षरस्यमंत्रस्यलक्षरुद्धार्द्धमेवच॥षडक्षरस्यमंत्रस्यनियुतंवायुतंतथा॥४॥तथापंचाक्षरस्यापिदशशतस्यैरपिच॥

अष्टाविंशद्वर्णमंत्रोजप्तव्योऽयुतसंख्यया॥५॥एवंनानाविधान्मंत्रान्जपंनिस्वेष्टसिद्धये॥त्वंतुपार्वतिमेवाक्यंशृणुष्वैकाग्रमानसा॥६॥एकाक्षरंचऽर्णंचषड्वर्णमंत्रमुत्तमं॥नमःशुक्रचतुर्थ्यांतमारंभंकुरुसुव्रते॥७॥अनुष्ठानंमासमात्रंकुरुकार्यंभविष्यति॥शिवमाप्स्यसिसुश्रीवंअन्यद्यच्चापिवांछितं॥८॥पार्थिवीपूजितामूर्त्तिःस्त्रियावापुरुषेणवा॥एकाददातिसाकाम्यंधनपुत्रपशूनपि॥९॥असाध्यंसाधयेन्मर्त्त्योमूर्त्तिद्वयप्रपूजनात्॥त्रिमूर्त्तिपूजनाद्राज्यंरत्नानिसर्वसंपदः॥१०॥चतुर्मूर्त्तिःपूजयेद्योधर्मार्थकाममोक्षभाक्॥सार्वभौमोभवेद्राजापंचमूर्त्तिप्रपूजनात्॥११॥षण्मूर्त्तिपूजनात्सिद्धिर्निर्मलपद्मम्भवेत्॥सप्ताष्टनवमूर्त्तीनांपूजयासर्वविद्भवेत्॥१२॥भूतंभव्यंभविष्यंचवेत्तिदेवप्रसादतः॥त्रयस्त्रिंशत्कोटिदेवाःहरींद्राद्यावसवः॥१३॥सनकाद्याःमुनिगणासेवंतेदशपूजनात्॥एकादशार्चनादेकादशरुद्राधिपोभवेत्॥१४॥द्वादशादित्यराज्यंचलभेद्द्वादशार्चनात्॥अनिशंकष्टवेलासुकुर्याद्ध्यानप्रपूजनं॥१५॥अष्टोत्तरशतंयावत्तावत्तवारमुपात्॥महामुक्तिमवाप्नोतिलक्षपूजनतोन्वहं॥१६॥कारयेद्बहून्भक्तिकामोकारयेन्मूर्त्तिपंचकं॥निस्तरणान्नचैतागणेशानुग्रहोस्तुते॥१७॥सप्तमूर्त्तीःप्रकुर्वीतप्रत्यहंपंचवत्सरं॥महापापात्प्रमुच्येतगणेशोभक्तिमान्नरः॥१८॥आज

न्ममरगणादेकापूजयेत्पार्थिवींनरः॥ गणेशः सतुविज्ञेयोदर्शनाद्विघ्ननाशनः॥१९॥ नमेवसर्वकार्येषुपूजयेद्गणाधिपं॥ तस्मैवपूजनात्प्रीतोदेवःस्यान्नैथा
स्वपं॥२०॥ सर्वरोगप्रपीडासुमूर्त्तिनांत्र्यमुत्तमं॥ नवाहंपूजयेद्यस्तुसर्वपीडांव्यपोहति॥२१॥ सौवर्णीराजतीताम्रीपैत्तिकांस्यसमुद्भवा॥ मौक्तिकीचम्र
वालीचसर्वमेतत्प्रयच्छति॥२२॥ एवंकृतेव्रतेदेविसर्वान्कामानवाप्नुयात्॥ यावन्भाद्रपदेमासिचतुर्थीपरिलभ्यते॥२३॥ तस्यांमहोत्सवःकार्योयथाविभ
सारतः॥ रात्रौजागरणंकार्यंतत्कथावाद्यगायनैः॥२४॥ प्रभातेविमलेस्नात्वापूर्ववत्पूजयेद्विभुं॥ गणेशंवरदंदेवंततोहोमंसमारभेत्॥२५॥ प्रभातेविम
लेस्नात्वापूर्ववत्पूजयेद्विभुं॥ गणेशंवरदंदेवंततोहोमंसमारभेत्॥२५॥ कुंडेसांगेस्थंडिलेवाहुनेन्मपरशांशतः॥ पूर्णाहुतिंततःकुर्याद्बलिदानपुरःसरं॥२६
न्माचार्यंपूजयेत्पश्चाद्गोभूवासोधनादिभिः॥ ब्राह्मणांस्तोषयेत्पश्चाद्धोमशेषंसमापयेत्॥२७॥ तर्पयेत्तद्दशांशेनतद्दशांशेनभोजयेत्॥ ब्राह्मणान्वेदविदु
षःसपत्नीकांश्चकांश्चन॥२८॥ तेभ्योभूषणवासांसिदद्याछत्त्रचदक्षिणां॥ दद्यात्स्त्रीणामलंकारान्योषिभ्यकंचुकादिकं॥ तुष्टयेगणनाथस्यसिद्धि
बुद्धियुतस्यह॥२९॥ वित्तशाठ्यंनकुर्वीतयथाविभवसारतः॥ ततःसुहृज्जनयुतःस्वयंभुंजीतसादरं॥३०॥ अपरस्मिन्दिनेमूर्तिंनृयानेस्थापयेन्मुदा॥ छत्रध्वज

परमर्षि

पताकाभिश्चामरैरुपशोभितां ॥ ३१ ॥ किशोरैर्दंडयुद्धेनयुध्यद्भिश्च पुरःशुभां ॥ महाजलाशयंगत्वा विसृज्य निनयेज्जले ॥ ३२ ॥ वाद्यगीतध्वनियुतो निजमंदिरमाहरेत ॥ ३३ ॥ इ
ति श्रीमद्गणेशपु० हिमवत्पार्वतीसंवादे चतुर्थीव्रतकथनं ॥ ५० ॥ पार्वत्युवाच ॥ गणेशाख्यचतुर्थ्यास्तु महिमा संनिरूपितः ॥ नववाक्यामृतेनाहं पितः श्रीनास्मि सांप्रतं ॥ १ ॥ परंतु
संशयो मेस्ति तं नुदस्व हिमालय ॥ केन केन कृतं पूर्वं व्रतमेतन्महीधर ॥ २ ॥ आख्यातं केन वा कस्मै कः कां सिद्धिमितो गमत ॥ एवं सविस्तरं ब्रूहि संशयच्छेदनाय मे ॥ यश्चापृ
च्छति यो वक्ति गजाननकथां शुभां ॥ शृणोत्यन्योपि यो मर्त्यस्तावुभौ पुण्यभागिनः ॥ ४ ॥ जीवितं सफलं तेषां जन्म ज्ञानं च कर्म च ॥ ब्रह्मोवाच ॥ एवं तया कृतं प्रश्नो हिमाचलोभ्यभा
षत ॥ ५ ॥ वरदस्य गणेशस्य नानाजनकृतं व्रतं ॥ गिरिरुवाच ॥ शृणु पार्वति वक्ष्यामि संवादं ते पुरातनं ॥ सेतिहासं व्रतस्यास्य सर्वसिद्धिकरस्य ह ॥ कैलासे गिरिवर्ये तु सुखासीनं
जगद्गुरुं ॥ ७ ॥ क्रीडमानं सुरैर्देवैर्गंधर्वैःभि ॥ नत्वा स्कंदो महातेजाः परिपप्रच्छ षण्मुखः ॥ ८ ॥ स्कंद उवाच ॥ देवदेव जगन्नाथ भक्तानामभयंकर ॥ नानाख्यानानि दिव्यानि
प्रसादात्ते श्रुतानि मे ॥ ९ ॥ तृप्तिं नाननगच्छामि पायं पायं सुधामिव ॥ अधुना ब्रूहि मे देव व्रतं सर्वार्थदं शुभं ॥ १० ॥ अनुष्ठानेन यस्याथ करस्थाः सिद्धयो नृणां ॥ जायते साध
कानां तु वरदस्य प्रसादतः ॥ ११ ॥ शिव उवाच ॥ साधु पृष्टं त्वया स्कंद सर्वेषां हितकाम्यया ॥ १२ ॥ कथयामि तव प्रीत्या महासिद्धिकरं भुवि ॥ विनायकप्रियं नाम व्रतानामुत्तमं व्र

॥गणे॥
॥०२॥

ते ॥ १३ ॥ सर्वेषांपुरुषार्थानांसाधकाह्नंतिकालज ॥ विनायकस्तथादानैर्जपहोमादिभिर्विना ॥ १४ ॥ सर्वसिद्धिकरंस्कंदपुत्रपौत्रप्रवर्द्धनं ॥ राजानंराजपुत्रंवानन्मंत्रि
णामथापिवा ॥ १५ ॥ वशमानतिक्षिप्रंव्रतमेतन्महामहतेमहापापोपपापैश्चबहुजन्मसुसंचितैः ॥ व्रतस्यास्यप्रभावेनपुमान्मुच्येतक्षणात् ॥ भाजनंसर्वसिद्धीनां
जायतेमानवोभुवि ॥ १६ ॥ प्रीतिदंतुगणेशस्यनानेनसदृशीक्षितौ ॥ स्कंद उ० ॥ तातकस्मिन्भवेन्मासिव्रतमेतन्महोत्तमं ॥ १७ ॥ विधानंकीदृशंचास्यकेनवाचरितं
पुरा ॥ सर्वमेतन्ममाचक्ष्वयद्यस्तिकरुणामयि ॥ १८ ॥ शिव उ० ॥ नभःशुक्लचतुर्थ्यांतुस्नात्वागुरुगृहंव्रजेत् ॥ प्रणम्यतंगुरुंपश्चात्पूजयित्वायथाविधि ॥ १९ ॥ पाद्या
चमनवस्त्रैर्भूषणैश्चसहचरैः ॥ तोषयित्वातुतंसम्यगाज्ञयापारभेद्व्रतं ॥ २० ॥ सर्वसिद्धिकरंतातव्रतंगाणेश्वरंगुरो ॥ त्वमेवश्रीगणेशोसिदिशकामप्रभो ॥ २१ ॥
उपदिष्टेव्रतेतेनसार्द्धंगगानतटंव्रजेत् ॥ तत्रागंदेवखातंचतत्रस्नात्वायथाविधि ॥ २२ ॥ श्वेतसर्षपयुक्तेनतिलकल्केनसन्मुख ॥ स्नात्वाथधात्रीयुतेनेहकृत्वानि
त्यंगृजेत् ॥ २३ ॥ उपविश्यासनेशुद्धेपूजयित्वागणाधिपं ॥ गुरूपदिष्टमार्गेणव्रतपश्चात्समाचरेत् ॥ २४ ॥ मृदामूर्त्तिंगणेशस्यचतुर्थ्यांश्रावणस्यतु ॥ प्रत्यहंपूजये
त्कृत्वायावद्भाद्रचतुर्थिका ॥ २५ ॥ ब्रह्मचर्यव्रतेस्थित्वाकर्तव्यंव्रतमुत्तमं ॥ उपवासैकभक्ताभ्यांनक्तेनायाचितेनवा ॥ २६ ॥ चतुर्थकालेभुंजीतहविष्यान्नंसमाहितः

॥राम॥
॥०३॥

अक्षारंमधुरंभुंजन्शक्तिमानाचरेद्व्रतं ॥ २७ ॥ जपन्गौरीश्वरीविद्यांषडाननषडक्षरं ॥ द्विचतुरक्षरांवापितथैवैकाक्षरामपि ॥ २८ ॥ दशाक्षरामथस्कंदद्वादशा
र्णांभथापिवा ॥ नियुतंवायुतंवापिप्रत्यहंजपरूष्यने ॥ २९ ॥ तदर्द्धंवातदर्द्धार्द्धंदशांशंहोममाचरेत् ॥ ध्यायन्गजाननंदेवंअहोरात्रमतंद्रितः ॥ ३० ॥ मोद्रे
मोद्रपदेमासिचतुर्थ्यांतुगजानन ॥ सौवर्णपलमानेनतदर्द्धार्द्धेनवापुनः ॥ ३१ ॥ मयूरवाहनंकुर्याद्रथवारुगनंशुभं ॥ कृत्वामंडपिकांतत्रधान्यराशिं
मकल्पयेत् ॥ ३२ ॥ सौवर्णंराजतंताम्रंकलशंस्थापयेत्ततः ॥ तस्योपरिन्यसेत्पात्रंरुक्मराजतताम्रजं ॥ ३३ ॥ वस्त्रयुग्मेनसंवेष्ट्यसपात्रंकलशंततः ॥ पं
चपल्लवसंयुक्तंपंचरत्नसमन्वितं ॥ ३४ ॥ पीठपूजांपुराकृत्वास्थापयेत्तत्रतंविभुं ॥ मूलमंत्रैश्चवेदोक्तैःपूर्वोक्तैरपिषण्मुख ॥ ३५ ॥ ध्यात्वागजाननंदेवमा
वाह्यपरयामुदा ॥ आसनंचतथापाद्यंदद्यादाचमनीयकं ॥ ३६ ॥ अर्घ्यंरत्नयुतंस्कंदस्नानंपंचामृतैःशुभं ॥ रक्तवस्त्रयुगंदद्यादुपवीतमथोत्तमं ॥ ३७ ॥
नानाविधैराभरणैर्भूषयेत्परमेश्वरं गंधाक्षतैर्धूपदीपैर्नैवेद्यैर्विविधैरपि ॥ ३८ ॥ वटकापूपलड्डूकशाल्यन्नंपायसादिभिः ॥ पंचामृतैर्व्यंजनैश्चभोजये
त्परमेश्वरं ॥ ३९ ॥ उद्वर्तनंकरेद्दद्यात्फलतांबूलमेवच ॥ कांचनींदक्षिणांदद्यात्तछत्रंव्यजनचामरे ॥ ४० ॥ नीराजनंमंत्रपुष्पंदत्वास्तोत्राणयुदीरयेत् ॥

सहस्रनामभिस्तुत्वा ब्राह्मणान्भोजयेत्ततः ॥ ४१ ॥ शचीं जागरणं कृत्वा गीतनृत्यादिमंगलैः ॥ प्रभाते विमले स्नात्वा नित्यं कृत्वा यथाविधि ॥ ४२ ॥ पूर्ववत्पूजयेद्देवं त
तो होमं समाचरेत् ॥ द्रव्यैर्नानाविधैर्हुत्वा कुर्यादाचार्यपूजनं ॥ ४३ ॥ गोभूतिलहिरण्याद्यं गुरवे तां निवेदयेत् ॥ अन्येभ्यो ब्राह्मणेभ्योश्च प्रदद्याद्भूरिदक्षिणां
॥ ४४ ॥ ब्राह्मणान्भोजयेत्पश्चाच्छतमष्टोत्तरं तथा ॥ अधिकान्यदि शक्तिश्चेदथवाप्येकविंशति ॥ ४५ ॥ दीनांधकृपणेभ्यश्च दद्यादन्नं सपायसं ॥ पुनश्च दक्षि
णां दद्यान्नत्वा शिवमनुत्तमं ॥ ४६ ॥ सुहृद्वंधुयुतो मौनी स्वयं भुंजीत सादरं ॥ शिव उ० ॥ एवं ते कथितं स्कंद वरदस्य व्रतं शुभं ॥ ४७ ॥ भुक्तिमुक्तिप्रदं नृणां सर्व
कामफलप्रदं ॥ ४८ ॥ इति श्रीमद्गणेशपु० उ० अध्यायः ॥ स्कंद उ० ॥ पितर्मे ब्रूहि तत्त्वेन केनाकारि व्रतं त्विदं ॥ यस्य प्रसादात्सकला संप्राप्ता सर्वसंप
दः ॥ १ ॥ महादेव उ० ॥ कार्तिकेय महाबाहो शृणु सादरमादितः ॥ पुरातनमितीहासमस्मिन्नर्थे वदामि ते ॥ २ ॥ पूर्वं कृतयुगे चासीद्राजा वै कर्दमाभिधः ॥ पालया
मास वसुधां सागरांतां स्वतेजसा ॥ ३ ॥ गुणैर्यस्मात्कृता देवा नित्यं तत्स्वरक्षिस्थिताः ॥ कदाचिद्दैवयोगेन भृगुस्तस्य गृहं गतः ॥ ४ ॥ तत उत्थाय राजा स बहुमान
पुरःसरं ॥ उपवेश्यासने श्रेष्ठे पूजितो गुरुवत्सनं ॥ ५ ॥ भुक्त्वा स्थितं मुनिवरं राजा वचनमब्रवीत् ॥ राजो० ॥ भगवन्सर्वतत्त्वज्ञ किंचित्पृच्छामि तद्वद ॥ ६ ॥ पूर्वजन्म

निकश्चाहंकिंमयासुकृतं ॥ येनेदृशंमयाराज्यंप्राप्तंनिहतकंटकं ॥ ७ प्राप्तंनैवेदृशंचान्यैर्नचप्राप्स्यंतिचापरे ॥ देवानामपिपूज्योहंगंधर्वोरगराक्षसां ॥ कुवेरसंपदांतु
स्त्वांसंपदंवशपमेमुने ॥ त्रिलोक्यांरत्नभूतंयत्तदानीतंस्त्वतेजसा ॥ ९ ॥ यंयंपदार्थमिक्षामितंतंपश्यामिवेश्मनि ॥ केनेत्थंकर्मणाप्राप्तंतद्वस्वममप्रभो ॥ कामेय
तत्पुनःकर्त्तुंपुण्यंपुण्यवतांवर ॥ १० ॥ भृगुरु ॥ कथयामिनृपश्रेष्ठप्रणिधानवलादहं ॥ त्वमासीत्पूर्वजनुषिविप्रस्त्रियोदुर्बलःशुचिः ॥ ११ ॥ कुटुंवभरणार्थंत्वंनाना
कर्माण्यथाकरोत् ॥ क्रियमाणंचतत्कर्मनचासीत्फलदंतव ॥ १२ ॥ अत्यंतनिष्टुरैर्वाक्यैर्दारापत्यैश्चपीडितः ॥ अथदृष्ट्वापुत्रदारांस्त्वंगतवान्गहनेवने ॥ १३ ॥
भ्रमंस्त्वंदिक्षुसर्वासुदृष्टवानसिसौभरिं ॥ सिंहासनेसमासीनंसेवितं~~सेवितं~~मुनिपुंगवैः ॥ १४ ॥ कथयंतंमहाविद्यांशिष्येभ्योदुःखनी ॥ दृष्ट्वातंसौभरिंदिव्यमन्यां
श्चर्षिगणान्नृप ॥ १५ ॥ दंडवत्पतितोसित्वंमुनिंतंश्वाभिनंदितः ॥ उपविष्टःस्वासनेचमुनिनातेनदर्शिते ॥ १६ ॥ दृष्टवानसितंदिव्यंलब्ध्वावसरमादृतः ॥ वि
प्र· ॥ स्वामिन्ससांरदुःखेनवहुधाक्लेशितोमुने ॥ १७ ॥ दारापत्यैःसहृद्भिश्चवान्धवैर्भृशताडितः नवैराग्यंमनोयातिनिष्टुरेषुसुतेषुच ॥ १८ ॥ क्षीणोस्म
क्षुत्पिपासाभिःपीडितोपिभृशंमुने ॥ उपायंवदमेकिंचिद्दुःखसागरतारकं ॥ १९ ॥ शिवउ ॥ इतिश्रुत्वावचस्तस्यसौभरिःकृपयायुतः ॥ उपायंचिंतयामास

नृपदुःखविनाशनं ॥ २० ॥ ततस्तंक्षत्रियंमामहंसर्वपापविमोचनं ॥ मामरि० ॥ अनयत्कथयिष्यामिकुरुनिश्चितमानसः ॥ २१ ॥ तस्यानुष्ठानमात्रेणसर्वदुःखल
योभवेत् ॥ ब्राह्मणैःक्षत्रियैर्वैश्यैस्तथाब्रह्मर्षिभिःकृतं ॥ २२ ॥ मुक्तास्तेसर्वदुःखेभ्यःप्राप्तासिद्धिमनुत्तमां ॥ वरदस्यगणेशस्यधर्मार्थकाममोक्षकृत ॥ २३ ॥ क्षत्रि०
कोसौगणेशः किंशीलंकिंस्वभाववान् ॥ किंकर्मःकथमुत्पन्नस्तत्सर्वंकथयस्वमे ॥ २४ ॥ मौंमरि० ॥ यद्ब्रह्मनित्यंविरजोविशोकंज्ञानस्वरूपंपरमार्थभूतं ॥ अ
नादिमध्यंतमनंतपारंगणाधिपंतंप्रवदंतिसंत ॥ २५ ॥ यस्माच्चोंकारसंभूतिर्यतोवेदायतोजगत् ॥ येनसर्वमिदंव्याप्तंतंविद्धिगणनायकं ॥ २६ ॥ जगत्सर्जन
कालेतुब्रह्मणायस्यतुष्टये ॥ अब्दानांतुशतंपूर्णंतपस्तप्तंसुदुष्करं ॥ २७ ॥ ततोतुष्टमनावेधाप्रसन्नंतमपूजयत् ॥ नानाविधोपचारैःसदिव्यरत्नैःफलै
स्तथा ॥ २८ ॥ सिद्धिबुद्धीतुमेकन्येमनसाकल्पितेददौ ॥ तुष्टोदेवोददौतस्मैविद्यामेकाक्षरींविभुः ॥ २९ ॥ ततोलब्धवरोब्रह्माचकारसकलंजगत् ॥ षड्
क्षरेणमंत्रेणविष्णुनातोषितंपुरा ॥ ३० ॥ कृत्वामूर्तिंगणेशस्यपूर्वोक्तविधिनाव्रतं ॥ अब्दंगंवर्षमेकंतुनियमात्कृतवान्हरिः ॥ ३१ ॥ वरंलब्ध्वागणेशात्तुपा
लयामाससर्वजगत ॥ एवंविधंविजानीयाग्गणेशंप्रभुसंस्कृतं ॥ ३२ ॥ विश्वरूपमनादिंचसर्वकारणकारणं ॥ तमाराधययत्नेनसर्वदुःखाद्विमोक्षसे ॥ ३३ ॥

॥स्त्रिउ॥ कस्मिन्मासेमकर्तव्यमेतद्व्रतमनुत्तमं॥ विधिनाकेनमेब्रूहीसांप्रतंमुनिसत्तम॥ करिष्येवचनात्तेहंसर्वदुःखप्रशांतये॥ ३४॥ मुनि॥ श्रावणेबहुलेपक्षेचतु
थ्यामारभेद्व्रतं॥ कुर्वीतपरयाभक्त्यायावब्दाद्वचतुर्थिक॥ उपचारैःषोडशभिःपार्थिवंगणनायकं॥ प्रत्यहंपूजयेद्भक्त्याब्राह्मणानपिभोजयेत्॥ ३५॥ लभेतेनकुरुभू
पालसर्वान्कामानवाप्स्यसि॥ इतिश्रुत्वाव्रतंतस्मात्कृतकृत्योसिसुव्रत॥ ३६॥ समाप्तेतुव्रतेतत्रसौभर्याश्रममंडले॥ तावत्तत्रगृहंदिव्यंगणेशस्यप्रसादतः॥ ३७॥
दिव्यनारीनरयुतंदासीदाससमन्वितं॥ वेदघोषसमायुक्तंजातगोधनसंकुलं॥ ३८॥ दिव्यवस्त्रसमायुक्तंनानालंकारशोभितं॥ अपस्यैत्वादृशैर्युक्ताविस्मि
तासीत्सतीसती॥ ३९॥ आयास्यतिकदाभर्त्तेत्येवंचिंतापराभवत्॥ तावत्समुनिमामंत्र्यागतोसिनिजमालयं॥ ४०॥ दिव्यंतच्छरणंहित्वास्वगृहंपरिमार्गयन्
तावद्भार्याप्रेषितास्त्वांनैन्युस्त्वद्भवनंनराः॥ ४१॥ ननस्त्वयापिविज्ञातोप्रभावोवरदस्यसः॥ तद्व्रतस्यप्रभावेनराज्यभागीहजन्मनि॥ ४२॥ शिवउ॥ इतिश्रुत्वा
भृगोर्वाक्यंकर्दमोहर्षनिर्भरः॥ चकारसकलंराजाभृगुणायत्समीरितं॥ ४३॥ व्रतस्यास्यप्रभावेनज्ञानवैराग्यवान्नृपः॥ भुक्त्वाभोगान्यथाकामंस्थाप्यपुत्रान्निजे
पदे॥ ४४॥ गतोगाणेश्वरधामयतोनावर्ततेपुनः॥ सर्वार्थसाधकंस्कंदव्रतानामुत्तमव्रत॥ ४५॥ नैतादृशंव्रतंदानंव्रतमन्यत्कदाचनः॥ सर्वार्थसाधकंस्कंदव्रतं॥

कुरुयदीछसि ॥ ४६ ॥ देवदानवगंधर्वैस्तं षिभिर्मुनिभिःत ॥ नलेनदंदुमस्ताचराज्ञा चंद्रांगदेनच ॥ ४७ ॥ संप्राप्तासर्वकामाश्चेगनागारोश्वरपदं ॥ ४८ ॥ गिरिजा·
इतितेकथितंसर्वसेतिहासंप्रमहत् ॥ कुरुत्वमनसाध्यात्वावरदंगणनायकं ॥ ४९ ॥ अनेनमेतन्महाभागेशंकरंप्राप्स्यसेतत ॥ लेहेनकथितंतेयप्रकाशंकुरु
माप्रतं ॥ ५० ॥ इतिश्रीमद्गणेशपुराणेउ·हिमवत्पार्वतीसं·इतिहासव·पू·२ पार्वत्यु ॥ नलेनेदंस्कृतंकस्मात्कोनलोवदमेपितः ॥ मनोविश्रांतिमायातिश्रुत्वैवं
त्वामेकपानकं ॥ १ ॥ हिमवान· ॥ निषधेषुमहाराजानलोनाम्नाभवत्पुरा ॥ ब्रह्मण्योवेदविच्छूरोदानीमानीधनीमुनिः ॥ २ ॥ सचवज्रीशरीचापीनिषंगीकव
चीवली ॥ कृतास्त्रोदेवपूज्यश्चत्रिलोकीरमनःशुचि ॥ ३ ॥ शेषोपिमूकतायातिवर्णितुंयद्गुणानपि ॥ नसंख्याविद्यतेश्वानांगजानांरथिनांतथा ॥ ४ ॥ धा
नुष्काणांशस्त्रभृतामस्त्रशस्त्रभृतामपि ॥ चकंपुर्यद्भयादेवाइंद्राद्यासदिगीश्वराः ॥ ५ ॥ दमयंतीतिभार्यासीद्यस्यसौंदर्यमंदिरं ॥ दमयित्वाखिलान्नसा
सारसारमगत्वच ॥ ६ ॥ दमयंतीतिविख्यातायन्नलेनविनिर्मिता ॥ दमयंतीत्रिलोकस्थनारीणांचारुतामदं ॥ ७ ॥ नानालंकारसंयुक्तानानामणिविभू
षिता ॥ मुक्ताहारलसत्कंठसद्गुणाक्षासुशोभना ॥ ८ ॥ यस्यामात्योमहानासीत्स्यमहस्तःपराक्रमी ॥ वुध्याहहस्पतिसमोनयेचांगिरसःसमः ॥ ९ ॥ तुगत्वेमे

सदृशोगांभीर्येणमहोदधि॥कदाचिदुपविष्टोसौनलोराजामहामनाः॥१०॥नियमात्सभामध्येनृपमंडलमध्यगः॥नृत्यंत्यप्सरसस्तस्यपुरतश्चसुदर्शनः॥११॥स्त
वनिवदिनस्तंचब्रह्मर्षिगणसंयुतं॥एतस्मिन्नेवकालेतुगौतमोनृपतिंययौ॥१२॥उत्थायसादरंराज्ञास्वासनेसंनिवेशितः॥पूजितःपरयाभक्त्यानतःपप्र
च्छतंनलः॥१३॥नलउ०॥स्वामिन्ननुगृहीतस्तेदर्शनेनमहामुने॥जन्मराज्यंपितामाताकुलंजीवितमद्यमे॥१४॥सफलंत्वागमंहेतुंवदतूर्णंमहामुन॥गौत
म०॥ममासीन्महतीवांछाद्रष्टुंतेवैभवंनृप॥१५॥स्तुवंतिदेवाःस्वर्गस्थाब्रह्मेंद्रहरिशूलिनः॥धन्योसिमृत्युलोकस्थोमर्त्यैर्देवैश्चशंस्यसे॥१६॥नित्यतृप्तो
स्पृहंतृप्तःपूजांदृष्ट्वाचवैभवं॥इदानीमनुजानीहिगमिष्येस्वाश्रमंप्रति॥१७॥नलउ०॥वेदवेदांगविद्वांस्त्वंसर्वशास्त्रप्रवर्त्तक॥दयानिधेक्षणंस्थित्वा
छिंधिमेसंशयंमुने॥१८॥गौतमो॥साधुपृष्टंमहाराजस्थितोस्मिस्नेहभावतः॥नागानृपाश्चदेवाश्चपतनोज्ञांनविलंघिनः॥१९॥नृपउ०॥ममैवविस्मयो
मत्तनिरीक्ष्यवैभवस्वक॥इत्थंममाभवत्केनपुण्येनतपसाथवा॥२०॥वदतत्त्वेनकश्चाहमभवंपूर्वजन्मनि॥मुनि०॥गौडदेशेपरेदेशेपुरेपिप्पलसंज्ञके
॥२१॥त्वमासीत्क्षत्रियःपूर्वंदरिद्रज्ञानवान्शुचिः॥जायापत्यैःसुहृद्भिश्चबाकूघोरैःपीडितोभृशं॥२२॥रात्रावपृष्ट्वासर्वांस्तान्निर्वेदाद्गहनंवनं॥गतवान्नृपसत्व

॥गणे०॥ स्त्रीभिः सिंहव्याघ्रगजैर्मृगैः ॥२३॥ सेवितं शीतलजलैः सरोभिर्जलजालिभिः ॥ आश्रमोथ त्वयादर्शि भ्रमता भामता वने ॥२४॥ तपोनिधेः कौशिकस्य वेदघोषनि

॥७०॥ नादिपावना ॥ दुखितं त्वां विदित्वा तु आशीर्वादमवीवदत् ॥२६॥ गजाननो मे वै वसौ भविता ते शुभंकरः ॥ श्रुत्वा तदाशिषः सौम्यां प्राप्तोसि परमां मुदं ॥२७॥ इष्ट

वानसि तं विप्रमुपाय सर्वकामदं ॥ दरिद्रनाशनं राजन्भुक्तिमुक्तिप्रदं शुभं ॥२८॥ कुरु मूर्तिं गणेशस्य मृन्मयीं चारुदर्शना ॥ पूर्वोक्तविधिना पूजां कुरु शृणु

कथानकं ॥२९॥ दिने दिने मासमात्रं ततः सिद्धिमवाप्स्यसि ॥ गौतमा० ॥ इति श्रुत्वा कौशिकं तं पुनः पप्रच्छ भूमिपः ॥३०॥ क्षत्रिय उ० गजाननं न जानामि त

त्स्वरूपं वदस्व मे ॥ ज्ञात्वा तं देवदर्शं करिष्ये व्रतमुत्तमम ॥३१॥ इति तेन कृतप्रश्नो जगाद मुनिसत्तम ॥ अनिर्वाच्यस्वरूपस्य परब्रह्मस्वरूपिणः ॥३२॥

प:कर्तोस वैकारिकस्वरूपाणि गजाननकृतानि च ॥ कौशि० उ० त्रैलोकानं पिता माता जगद्गुरु ॥३३॥ ब्रह्मेन्द्रशिवविष्णूनां ध्येयो यः स गजाननः ॥ इति श्रुत्वा नृपस्तदा कं

प्रणिपत्य मुनीश्वरं ॥३४॥ अनुज्ञातस्ततस्तेन पतोसि निजमंदिरं ॥ आरभ्य श्रावणे मासि चतुर्थ्यां व्रतमं ॥३५॥ अकरोन्मृन्मयीं मूर्तिं गणेशस्य यथोदितां ॥ स्था ॥राम॥

ने च वचने मौने गमने शयने भुजि ॥३६॥ ध्यायन्गजाननं देवं प्राप्तसिद्धिमनुत्तमा ॥ नानारथगजाश्वैश्च क्षेर्गोधनैर्धनसंचयैः ॥३७॥ दासीदाससुतः श्रीमान्जातो व्रत ॥७०॥

प्रभावतः ॥ दत्तवान सिद्धानानि सर्वाणि देवतुष्टये ॥ ३८ ॥ गणेशस्य महामौल्यं प्रासादं कृतवान्मुदा ॥ भुक्त्वा भोगान्यथाकामान् कालेन निधनं गतः ॥ ३९ ॥
जातोसि निषधे देशे नृपस्त्वं नलनामकः ॥ अनंतस्त्वया चलालक्ष्मीस्त्रिलोकीजनवंदितः ॥ ४० ॥ इदानीमनुजानीहि यत्पृष्टं तं निरूपितं ॥ हिमवा० ॥ एवंग
नेगौतमेनुक्तं स्वकेन नलो नृपः ॥ ४१ ॥ तद्वाक्याज्ज्ञातविश्वासो मूर्तिं कृत्वा सुशोभनां ॥ श्रुत्वा कथां गणेशस्य मत्स्यहं पूज्य भक्तितः ॥ ४२ ॥ अलभत्सर्वकामा
न्स्वव्रतस्यास्य प्रसादतः ॥ इति ते कथितं सुभ्रु नलेनेत्थं कृतं व्रतं ॥ ४३ ॥ उपदिष्टं गौतमेन पूर्वजन्मकृतं व्रतं ॥ अस्य प्रभावं संपूर्णं वक्तुं केनापि नेष्यते ॥ ४४ ॥
॥ इति श्रीमद्गणेशपु० उ० हिम० पार्वतीसं० नलव्रता ॥ ५३ ॥ हीमवा० ॥ इदानीं कथयिष्यामि राज्ञा चंद्रांगदेन च ॥ तद्भार्यया कृतं त्वेतदिदं हुमस्ता शुभानने १
मालवे विषये ख्यातं नगरं कर्णनामकं ॥ तत्र चंद्रांगदो राजा बभूवातिपराक्रमी ॥ २ ॥ अणिमादिगुणोपेतः सर्वशास्त्रार्थतत्वविन् ॥ यज्वा दानी महात्या
गी वेदवेदांगपारगः ॥ ३ ॥ अतिक्रांता सभा यस्य सुधर्मामतिमानुषी ॥ मुक्तानि च सुधांतेजोरविकांतमरीचिभिः ॥ ४ ॥ तान्येव शीततां यांति चंद्रकांतमरीचिभिः
अनिस्वच्छानि वासांसि रत्नस्तंभाश्रया सुते ॥ ५ ॥ नीललोहितपीतत्वचित्रतां यांति कानिचित् ॥ अतिसाध्वी महाभागा पतिशुश्रूषणे रता ॥ ६ ॥ धर्मशीला

व्रतपराश्वश्रुश्वसुरसेविना ॥ गृहकृत्येषु चाव्यग्रा देवतातिथिपूजका ॥७॥ धर्मशीलोपि नृपतिरमात्यैः प्रार्थितो भृशं ॥ कदाचिद्दैवयोगेन मृगयां क्रीडितुं
ययौ ॥८॥ तरक्षुरुरुवाराहमृगपक्षियुतं वनं ॥ नीलकंचुकसंवीतो नीलोष्णीषोनरच्छदः ॥९॥ बद्धगोधांगुलित्राणस्त्रिकाखड्गखेटवान् ॥ जवेनाश्वं स-
मारूढो धनुर्बाणकरो वली ॥१०॥ ताहृशैर्वीरनिकरैरमात्यैः सेवकैर्हितः ॥ निघ्नन्मृगान्वराहांश्च प्रययौ नगरं प्रति ॥११॥ भ्रममाणो वने राजा दृष्टो राक्षसपुंगवै
वकपे राक्षसान्दृष्ट्वासीत्तत्वरयुतोयथा ॥१२॥ हरीमुखागतेनेत्राव्यादितास्यान्भयस्पृशः ॥ दृष्ट्वा तान्विद्रुताः सर्वे वीरास्ते विजना अपि ॥१३॥ केचिद्भयमस्त-
पंपाना मूर्छिताः केपि भूगताः ॥ तत्रैका राक्षसी क्रूरा दृष्ट्वा कामातिसुंदरा ॥१४॥ तं नृपं परिरभ्यैव चुचुंबे काममोहिता ॥ तस्या मास्यान्भगे कृत्वा भक्षया-
मास सेवकान् ॥१५॥ एतस्मिन्नंतरे राजा पलायनपरो ययौ ॥ कासारमध्ये मग्नो भूत्वा ह्यासीद्रक्षसीचनं ॥१६॥ स धृतो नागकन्याभिर्नीतः पातालमं-
दिरं ॥ भूषितो नागकन्याभिर्वस्त्रालंकारभूषणैः ॥१७॥ पप्रच्छ नागकन्यास्तं कुत आगमनं तव ॥ कोसि कस्यासि किंनाम वद सत्यं नरोत्तम ॥१८॥
इति तद्वचनं श्रुत्वा तां जगाद नराधिपः ॥ अहं चंद्रांगदो नाम हेमांगदसुतो वली ॥१९॥ मालवे विषये कर्णानगरे वसतीर्मम ॥ राक्षसीभयसंत्रस्त

ःप्रविष्टःसलिलंमहत् ॥ २० ॥ भवतीभिरिहानीतोयस्त्वदृष्टंतन्नवेदितं ॥ भक्षितासर्वलोकामेमृगयाभिरतस्यहि ॥ २१ ॥ सरोजलप्रसादेनजीवंतिष्ठामिसांप्रतं ॥ इ
तिनावचनंश्रुत्वापुनरूचेनृपंतदा ॥ २२ ॥ नाऊचुः ॥ भवास्माकंपतिरिहसर्वस्सस्वतिनेप्रिये ॥ अस्माकंनागकन्नोभोगश्चातीवदुर्लभं ॥ २३ ॥ तासामितिवचःश्रुत्वाप्रोवा
चनृपसत्तम ॥ एकपत्निव्रतंमेस्तिमानरस्त्वंकथंत्यजे ॥ २४ ॥ सोमवंशप्रसूतानांराज्ञांधर्मोत्रयीमितः ॥ परद्रव्यंपरद्रोहंपरदारांस्तथैवच ॥ २५ ॥ परनिंदांचनेछंतिनृ
पाःसोम्याश्चसाधवः ॥ अधीतिर्यजनंदानंशरणागतपालनं ॥ २६ ॥ निषिद्धाकरणंचैवविध्यर्थप्रतिपालनं ॥ एतेधर्मास्त्रिवर्णानांयाजनादित्रयंद्विजे ॥ २७ ॥ अधि
कारंसर्ववर्णानामातिथ्यंपरमंमतं ॥ इतिश्रुत्वानृपवचःखिन्नाःनागकुमारिकाः ॥ २८ ॥ भवेत्प्रभुःत्वंवियुक्तस्त्वंबहुधास्वस्त्रियाभव ॥ वबंधुर्निगडैस्तंतादुःखिताः
कामविह्वलाः ॥ २९ ॥ राक्षसीतुजलेप्राप्तनदर्थंतत्सरोगतं ॥ भक्षयित्वाजलचराननृप्यत्सरमनतदा ॥ ३० ॥ इमम्वृत्तांतमश्रृणोद्राज्ञीराजीवलोचना ॥ पर्यंकस्पास्वहस्ता
स्ताराक्षसीतोवशेषितात् ॥ ३१ ॥ मग्नंनिशाम्यनृपतिंदुःखितापतिताभुवि ॥ मूर्छामवापमहतींसखिभिःपरिवीजिता ॥ ३२ ॥ सिक्ताशीतलतोयेनरुदतीभिर्मुहुः
र्मुहुः ॥ उपविष्टाप्ररुदतीघ्नंतीवक्षःशिरोमुखं ॥ ३३ ॥ शुशोचपरमात्तापैर्भर्तःकांतेतिजल्पति ॥ क्वगतःप्राणनाथोमेहित्वामांप्रियवादिनी ॥ ३४ ॥ सर्वावयवसं

पूर्णांप्रसन्नांप्रियकारिणीं ॥ मृदुवाक्यरतांनित्यंनित्यंचातिथिपूजकां ॥ ३५ ॥ कुत्रभोक्ष्यतिमेनाथोनिद्रांकुत्रयास्यति ॥ कांचनंशयनंहित्वापराध्यास्तरणोर्यतं ॥ ३६ ॥
कथंस्नास्यतिकांतोमेहित्वातैलंसुगंधिमत् ॥ लोकानांपालनंकोत्रविनानेनकरिष्यति ॥ ३७ ॥ प्रजानांसर्वलोकानांबालानांरंजनंचकः ॥ अत्लेयानोगुणनिधिः
प्रतापनिधिरद्यकिं ॥ ३८ ॥ दिशःशून्याःप्रपश्यामिविनानेनमहात्मना ॥ क्वाहंसुखंप्रयास्यामिक्वसुखंसोपियास्यति ॥ ३९ ॥ इहलोकेपरेवापिनसुखंकुलयोषि
तां ॥ हीनानांस्वामिनादेवपरे [illegible] तस्वामिनासह ॥ ४० ॥ शरणागतगुप्तिंचहीनानांकःकरिष्यति ॥ एवंबहुविधंहीनाहरुदतीभृशविह्वला ॥ ४१ ॥ तस्याश्चत्रोटयि
त्वाभूषणानिचभूरिश ॥ कंकणानिचसर्वाणिप्रभंजचमुमूर्छच ॥ ४२ ॥ इतिश्रीमद्गर्ग[illegible]·उ·हिमव·पार्वं·चंद्राग·४४·पार्वं· ॥ तस्मातुमूर्छितांयांवैकिमकु
र्वंजनास्तदा ॥ तन्मेविस्तरतोब्रूहित्वदर्शनंपितः ॥ १ ॥ शौनक ॥ तदासर्वेनागरिकानानावाक्यविशारदः ॥ ममृत्यस्वानिचाश्रूणिसमारध्युर्नृपस्त्रियं ॥ जनाऊ ॥ ना
मातरुत्तिष्ठमाशोकंकुरुपुत्रेमनःकृथा ॥ मनेदहतिशोकाग्निस्तस्मात्त्वंहितंकुरु ॥ ३ ॥ मत्स्वेषुनहिहस्तोस्तिचिरजीवीशुभानने ॥ यथाजीर्णंपरित्यज्यवासोन्यत्
गृह्यतेजनैः ॥ ४ ॥ वर्षाण्यपिदेहिनातद्वत्यक्त्वान्यद्गृह्यतेशुभं ॥ अत्याश्चर्यमिदंभद्रेस्वयंमृत्युमुखेस्थितः ॥ ५ ॥ शोचतेमृतमपरंस्वयंम [illegible] रणधर्मवान् ॥ ६ ॥

स्वदेहेनवियोगंचनवेत्तिभाविनंजनः॥६॥मदीयंमन्यतेसर्वंदेवकालवशेस्थितं॥ब्रह्मादिस्तंबपर्यंतंयद्विश्वंसचराचरं॥७॥ज्ञात्वातन्नश्वरंशोकंत्यक्त्वानिय
सुपुत्रिणि॥धर्ममेवानुपण्यशीलस्त्वेभर्तामुक्तिंगतोभवेत्॥८॥जीवन्मद्दिभवेल्लोगेनतदायास्यतिकर्हिचित्॥अथवापरिपृच्छामोमुनेकंचिदिहागतं॥९॥अ
तीतानागतविद्वंकथयिष्यतिसोखिलं॥अनंतरंतुयत्कार्यंतत्सर्वंविदधामहे॥१०॥एवमबोधितालोकैःस्वरामिंदुमतीतदा॥आश्वस्तासर्ववाक्येनममृत्या
भूशिाव्यमसमा॥विसर्जयामासततालोकान्सर्वान्समागतान्॥त्यक्त्वाशोभाग्यचिह्नानिमपदेहेकशालाभूषणं॥१२॥रुदंतीशोचनीतस्थौश्वसतीमूर्छितामुहुः
ततोद्वादशवर्षांतेनारदोदिव्यदर्शनः॥१३॥आजगामगृहंतस्यायदृच्छाविचरन्मुनिः॥दृष्ट्वातंविललापासौवदंतीभर्तृचेष्टितं॥१४॥दुःखंचाकथयत्तस्मैजा
तंद्वादशवार्षिकं॥निशम्यगदितंतस्याहर्षयन्मुनिरब्रवीत्॥१५॥नारदो०॥ क्वापितिष्ठतितेभर्तानतंशोचितुमर्हसि॥शिरश्छादयनीलेनवाससाकर्णाभू
षणे॥१६॥कर्णयोःकुरुभालेत्वंबिभ्रतीकुंकुमंशुभं॥वलयानिस्वकरयोःकंठेमंगलसूत्रकं॥१७॥गिरि०॥सर्वंतस्यमुनेर्वाक्याद्विश्वस्तासत्यवादिनः॥त
त्कालसर्वमानीयहर्षिताचतथाकरोत्॥१८॥आकार्यब्राह्मणान्सर्वान्संपूज्यनारदंपुरा॥संपूज्यसकलांस्तांस्तुददौदानान्यनेकशः॥१९॥वादयामा

॥गणेश॥
॥८०॥

सवाद्यानिशर्करांचगृहेगृहे॥ प्रेषयामासचतदाहर्षादिंदुमतीशुभा॥२०॥ वस्त्रतांबूलदानेनदत्वाचाक्षतांजनस्यसा॥ प्रणिपत्यपुनर्देवमुनिंनारदमादरात्॥
॥२१॥ स्वभर्तृप्राप्तयेपृच्छदुपायंराजकन्यका॥ इंदु·॥ कुत्रतिष्ठतिमेभर्त्ताकथंतिष्ठतिवामुने॥२२॥ केनोपायेनसर्वज्ञदर्शनंतस्यमेभवेत्॥ नार·॥ व्रतेनानुप
मेनेहंकथयामिसमासतः॥२३॥ नभःशुक्लचतुर्थ्यांचव्रतारंभेत्वयापुरा॥ नद्यांतडागेवाप्यांवादंतधावनपूर्वकं॥२४॥ स्नानंप्रभातसमयेकुरुसंकल्पपू
र्वकं॥ शुक्लवासागृहंगत्वामृन्मयींमूर्तिमुत्तमां॥२५॥ कुर्याच्चतुर्भुजांसम्यग्गणेशस्यमनोरमां॥ उपचारैःषोडशभिःपूजयेत्स्थिरचेतसा॥२६॥ एकान्नमे
कभक्तंवास्वयंकुर्यात्प्रयत्नतः॥ गीतवादित्रनृत्याद्यैर्ब्राह्मणानांचभोजनैः॥२७॥ महोत्सवंप्रकुर्वीतदिवसेसतिशोभने॥ एवंव्रतंकुरुशुभेभर्त्तासहसमेष्यसि
॥२८॥ पातालेनागकन्याभिर्वेष्टःकष्टेनजीवति॥ सत्यंब्रवीमितेसत्येनान्यथाममभाषितं॥ द्विज·॥ इत्युक्तातेनमुनिनाव्रतंचारमदादरात्॥ गतेमुनौनभोमा
सिदिनैःकतिभिरागते॥३०॥ द्विरदाननमूर्तिंसाचकारपार्थिवींशुभां॥ पूर्वोक्तविधिनापूजांचकारसुमनोहरां॥३१॥ दिव्यगंधैर्दिव्यवस्त्रैर्दिव्यैश्चकुसुमैर
